Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 3 | ISSN : 2581- 6306

# मुख्यार्थबाधाभावेऽपि व्यञ्जनानिरूपणम्

डॉ. छगन लाल महोलिया
सह आचार्य – संस्कृत. श्री रतनलाल कंवर लाल पाटनी , राजकीय स्नात्तकोत्तर महाविद्यालय, किशनगढ़, अजमेर।

**शोधसारांशः**– तात्पर्यवृत्त्या गतार्थेऽयमिति चतुर्थमपि मतं न समीचीनम्, यतो हि यद्यत्र आलङ्कारिकाभिप्रेता तात्पर्यवृत्ति: स्वीक्रियते, तर्हि वाक्यार्थरूपस्य पदार्थद्वयसंसर्गस्य बोधनाय सा वृत्तिरङ्गीकृतास्ति। तस्या अत्र सामर्थमेव नास्ति। अतएवाभिधा-लक्षणातात्पर्यख्यासु तिसृष्वपि वृत्तिषु विरतासु चतुर्थी व्यञ्जनावृत्तिरुपास्यते इत्युक्तम्। यदि तु शाब्दबोधे हेतुभूतं तात्पर्यज्ञानमभिप्रेयते, तदास्तु नाम शाब्दहेतुता तस्य भवदुक्तं नियमनपि तदीयमस्तु नाम वृत्तिस्त्वियं स्वीकरणायैव शाब्दबोधे पदवृत्तिजन्योपस्थिति विषयस्यैव पदार्थस्य मानाय। अन्यथा शक्तिलक्षणयोरपि कथं न त्याग:? उक्तानुक्तव्यवसायविरोधस्तु स्थीयत एवेति विचारणीयतामञ्चति सचेतसाम्।
**मुख्यशब्दाः**– मुख्यार्थ, अभाव, व्यंजना, शब्दशक्तिः , तात्पर्यवृत्तिः, शाब्दबोधः।

---

व्यञ्जनां शब्दो विशिष्टार्थसूचक 'वि' उपसर्गपूर्वकदीपनार्थकात् 'अञ्ज' धातो: साधनार्थसूचक'ल्युट्'प्रत्यये 'टाप्' योगेन सिद्धयति। उक्तं यथा साहित्यदर्पणम् -

**''विरतास्वभिधाद्यासु ययाऽर्थो बोध्यतेऽपर:।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।।''**

अर्थात् अभिधा वाच्यार्थं, लक्षणा लक्ष्यार्थं तात्पर्यवृत्तिश्च तात्पर्याऽर्थं बोधयित्वा निवर्तते ततश्च ता अर्थान्तरबोधनेऽसमर्था भवन्ति, तदनन्तरं या वाच्याद्यर्थातिरिक्तमर्थं बोधयति सा वृत्तिर्व्यञ्जना नाम्।

**उक्तं वैयाकरणसिद्धान्तलघुमञ्जूषायाम् -**मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारण: प्रसिद्धाप्रसिद्धार्थ-विषयको वक्त्रादिवैशिष्ट्यज्ञान प्रतिभाद्युद्बुद्ध: संस्कारविशेषो व्यञ्जना।

**अयं भाव-** प्रतिभोद्बुद्धोऽर्थविषयक: संस्कारविशेषो व्यञ्जनेति। संस्कारविशेषश्च मुख्यार्थनिर-पेक्षबोधजनक: मुख्यार्थसम्बद्धासम्बद्धसाधारण: प्रसिद्धाप्रद्धिार्थविष्यक: वक्त्रादिवैशिष्टय-ज्ञानप्रतिभाद्युद्बुद्धश्च। तेन व्यञ्जना न लक्षणया गतार्था। लक्षणा तु मुख्यार्थानुपपत्तावेव प्रवर्तते; यथा 'गङ्गायां घोष:' इत्यादौ:। व्यञ्जना तु तन्निरपेक्षमेव प्रवर्तते; यथा 'नि:शेषच्युतचन्दनं स्तनतटम्...' इत्यादौ मुख्यार्थबाधाभावेऽपि अधमपदपर्यालोचनया रन्तुमेव गताऽसीति व्यङ्गयार्थप्रतीति:। लक्षणा मुख्यार्थसम्बद्धा, व्यञ्जना तु क्वचिदसम्बद्धाऽपि यथा गङ्गायां घोष इत्यत्र शैत्यपावनत्वादि गङ्गापदस्य प्रवाहरूपमुख्या-र्थसम्बद्ध: व्यञ्जनाविषय: 'नि:श्वासान्ध इवादर्श:' इत्यत्रासम्बद्ध: अप्रकाशत्वरूपव्यङ्गयार्थ-स्तद्विषय:। एतेन व्यञ्जना लक्षणाभिन्नैव न तया गतार्थेति स्पष्टमेव। न च व्यञ्जना शक्ति:। शक्ति: प्रसिद्धार्थविषया, व्यञ्जना प्रसिद्धाप्रसिद्धार्थविषया; यथा 'राजत्युमावल्लभ:' इत्यत्र उमावल्लभत्वं शङ्करस्यापि प्रसिद्धमेव यद्धि व्यञ्जनाया विषय:। अप्रसिद्धार्थश्च वक्त्रादिवैशिष्टयज्ञानोत्पन्न: प्रतिभाशालिनामेवावगम्य: यथा 'दक्षिणं नयनं हरेरि'त्यत्र हरेर्दक्षिणनेत्रस्य तूर्यात्मकत्वमर्थ:। अभिधा हि सामान्यजनविषय:, व्यञ्जना तु प्रतिभाशालिजनविषय इति। उक्तञ्चान्यत्र -

**विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपर:।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।। इति**
**यस्य प्रतीतिमादातु लक्षणा समुपास्यते।**
**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।।**
**'योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा।।' इति च।**

**नैयायिकमतखण्डनम्-** नैयायिका हि व्यञ्जनां शक्तिलक्षणाऽनुमानेष्वन्तर्भावयन्ति तां पृथग्वृत्तित्वेन न गृह्णन्ति। यत्र नानार्थकस्थले शब्दशक्तिमूला व्यञ्जना सा शक्त्यैव गतार्था यथा 'दूरस्था भूधरा रम्या:' इत्यत्र भूधरस्य पर्वतार्थ इव भूपार्थोऽपि शक्त्यैवोपस्थाप्यते।

लक्षणामूला व्यञ्जनाऽपि लक्षणयैव गतार्था यथा गङ्गायां घोषः इत्यादौ शैत्यपावनत्वाद्यपि लक्षणयैव बोध्यते। अर्थशक्तिमूला व्यञ्जनाऽनुमानेऽन्तर्भवति। तेन व्यञ्जनाख्या काचित् पृथग्वृत्तिरिति तन्मतम्।

न हि लक्षणायां व्यञ्जनाऽन्तर्भवितुमर्हति। मुख्यार्थबाधे सति तत्सम्बद्धार्थबोधिका हि लक्षणा रूढिं प्रयोजनं वाऽऽश्रित्य। व्यञ्जना तु न तत्प्रकृतिका, किन्तु तद्विलक्षणस्वरूपा। सा हि न मुख्यार्थबाधमपेक्षते, न च शक्यार्थसम्बद्धमात्रार्थबोधकत्वं तत्र। यथा हि 'गङ्गायां घोषः' इत्यत्र शक्तिर्हि गङ्गापदस्य प्रवाहरूपशक्यार्थमुपस्थाप्य निवर्तते। निवृत्ता सा विरम्य व्यापाराभावान्न पुनस्तत्र प्रवर्तते। न च गङ्गागतशैत्यपावन-त्वादि सङ्केतार्थ एव। निवृत्तायां शक्तौ शक्यार्थस्य घोषेऽनन्वयात्तात्पर्यानुपपत्तेश्च तद्बाधेन शैत्यपावनत्वादिप्रयोजनमाश्रित्य लक्षणा प्रवर्तते बोधयति च तटरूपं सामीप्यसम्बन्धेन मुख्यार्थभूतप्रवाहसम्बद्धार्थम्। ततः साऽपि निवर्तते। ततश्च व्यञ्जनया शैत्यपावनत्वादि-प्रयोजनं व्यज्यते। न हि तल्लक्षणयोपस्थापयितुं शक्यते हेत्वभावात्। न हि तटरूपलक्ष्यार्थो मुख्यो न च तद्बाधः न च प्रयोजनमेव तत्र तत्प्रवृत्तेः। प्रयोजनस्य प्रयोजनं न सम्भवति। न च शब्दः स्खलद्गतिरिति वाचकशब्दे सत्यपि यस्य प्रतीतिमाधातुं शब्दो हि लाक्षणिकत्वेन प्रयुज्यते तद्धि तेन व्यञ्जनयैव व्यज्यत इति।

न च व्यञ्जनाऽनुमाने एवान्तर्भवति तत्र हेतूनामाभासत्वात्, न च स्मृतिमात्रेण सा सिध्यति इति सिद्धं व्यञ्जनाया अपि पृथगेव वृत्तित्त्वम्।

**अथ व्यञ्जनायाः स्वरूपम्-** शिष्यानध्याप्य सायंकाले गुरुर्वक्ति - 'अर्कोऽस्तं गतः' इति। वाक्यनिष्ठशक्ति-सम्बन्धेन सूर्यकतृकं भूतकालिकमस्तंगमनमिति बोधो भवति। परन्तु तद्बोधेन सहृदयानां न भवति विश्रान्तिः अपि तु अस्माभिः सर्वैरपि सन्ध्योपासनं कर्तव्यमिति अस्य द्वितीयार्थस्य बोधेनैव विश्रान्तिर्लभ्यते। स चायं द्वितीयोऽर्थ उक्तवाक्येन सम्बद्ध एव बोध्यते, असम्बद्धो वा? न तावदन्त्यः पक्षः, असम्बद्धार्थबोधनेऽतिप्रसङ्गो दुर्निवारः स्यात्। कस्याप्यर्थस्य बोधोऽस्तु नाम, को वारयेत्? नापि प्रथमः, सम्बन्धस्याभावध्यज्ञातत्वादिति चेत्, उच्यते- यो हि सम्बन्धो भवद्भिरज्ञातः, स व्यञ्जनाभिधोऽस्तीति ज्ञायताम्। शब्दतदर्थयोरयं सम्बन्धो द्योत्यद्योतकभावव्यङ्ग्यव्यञ्जकभावशब्दाभ्यामपि संकीर्तितो भवति। अयं च सम्बन्धो वाच्यवाचकभावरूपशक्तिसम्बन्धात्, लक्ष्यलक्षणभावरूप-लक्षणासम्बन्धाच्च विलक्षण एवास्ति।

शक्यार्थसम्बद्धः, असम्बद्धो वा नानाविधोऽर्थोऽनेन सम्बन्धेन बोध्यते। व्याकरणदर्शनस्य त्वयं सम्बन्धः प्राणभूत एवास्ते। एनमन्तरा व्याकरणशास्त्रसर्वस्वभूत-स्फोटतत्त्वस्य प्रकाशनमेव न भविष्यति। उक्तञ्च महर्षिणा व्याडिना -

**शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।**

**स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते।।**

**श्रीभतृहरिणाऽपि -** 'प्रत्येकं व्यञ्जका वर्णा भिन्ना वाक्यपदेषु ये' इति।

अथ प्रथमोक्त्या प्राकृतध्वनिभिः शब्दस्य(स्फोटस्य) व्यञ्जकत्वम्। वैकृतध्वनिभिः स्फोटस्य स्थितिविशेषहेतुत्वं प्रतिपाद्यते। द्वितीययोक्त्या प्रत्येकं वर्णाः पदस्फोटं वाक्यस्फोटं च व्यञ्जन्ति। अत्र वर्णपदेन प्राकृतध्वनिरेव गृह्यते। अत एव चोक्तम् 'प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते' इति। यतः प्राकृतध्वनिः स्फोटस्य व्यञ्जिका, अतस्तदीयो मात्राद्विमात्रात्रिमात्रात्मकः कालः स्फोटस्यारोपितः कालो भवति स्फोटस्तु वस्तुतो दिग्देशकालाद्यनवच्छिन्न एव विभुनोऽपरिमितत्वादनवच्छिन्नत्वाच्च।

आभ्यामुक्तिभ्यां ध्वनेव्यञ्जकत्वं सुस्पष्टमायाति, अतश्च ध्वनिगता व्यञ्जनावृत्तिः स्वीकार्या। अनया व्यञ्जनया स्फोटस्य स्वरूपमभिव्यक्तं भवति। अतः स्फोटरूपव्यङ्गयेन सहध्वनिरूपव्यञ्जकस्य व्यङ्ग्यव्यञ्जकभावसम्बन्धः सुसम्पन्नो भवति। परन्त्वनया व्यञ्जनया पदार्थबोधो वाक्यार्थबोधो वा न भवति। अर्थस्य बोधस्तु स्फोटेनैव प्रकाशितेन भवतीति जिज्ञासायां तदपि तत्त्वं शाब्दिकैरभ्युपेयत एव स्फोटोऽप्यर्थस्य व्यञ्जकी भवतीति।

**व्यञ्जनायां प्रमाणम् -** प्रमाणं चात्र 'उपसर्गाः क्रियायोगे' इति सूत्रीयं भाष्यम्। तत्र हि क्रियायोगे इत्यनेन क्रियया सहोपसर्गस्यार्थव्यङ्ग्यव्यञ्जकभावसम्बन्ध एव स्वाभिप्रेतो भगवतः सूत्रकारस्य, न तु वाच्यवाचकभावः, स तु क्रियया सह धातोरेव। किञ्च 'भूवादयः' इति सूत्रीयभाष्यमात्रास्ति प्रमाणभूतम्। तथाहि 'क्रियाविशेषक उपसर्गः पचतीति क्रिया गम्यते, तां प्रत्युपसर्गो विशिनष्टि' इत्युक्तं भाष्यकृता। उद्योतकारेण चैवं व्याख्यातम् - 'क्रियाविशेषक उपसर्ग इति यथाऽन्वयव्यतिरेकाभ्यां प्रत्ययोऽर्थबोधकः, तथा ताभ्यामेव क्रियागतविशेषद्योतक उपसर्गः क्रियावाची धातुरेवेति भावः' इति। अत्र क्रियाविशेषक उपसर्गः, क्रियागतिविशेषद्योतक इत्यर्थः। एवञ्च क्रियाविशेषस्य द्योत्यता, उपसर्गस्य द्योतकता स्पष्टं लभ्यते। क्रियोपसर्गयोः द्योत्यद्योतकभाव-सम्बन्धः सुतरामनुभूयते।

किञ्च 'भूवादयः' इति सूत्रस्य क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्यु इत्यर्थे क्रियावाचिन इत्यंशो व्यञ्जनावृत्तिमहिम्नैव लब्धः अन्यथा वादयो भ्वादयो धातुसंज्ञा इति प्रथमकक्षा ततश्चादिशब्दस्य प्रकारवाचितया वा प्रकारा भ्वादयो धातुसंज्ञा इति द्वितीय कक्षा ततः प्रकारशब्दस्य सदृशार्थकत्वेन वा सदृशभ्वादयो धातु संज्ञा इति तृतीया कक्षा, ततश्च प्रतियोगितावच्छेदक व्यापकीभूतधर्मेण सादृश्यं गृह्यत इति नियमबलेन क्रिया-वाचिनो भ्वादय इत्यादि लभ्यते, प्रतियोगितावच्छेदकत्वव्यापकीभूतेन क्रियावाचित्वेन सादृश्यस्य ग्रहणात्।

इदं च क्रियावाचित्वं न शक्त्या लब्धुं शक्यम्। वादिपदस्य तत्र शक्तेरभावात्। नाऽतिलक्षणया प्राप्तव्यः, लक्षणायाः शाब्दिकमतेऽभावात्। नाऽपि शक्यतावच्छेदक-स्योरोपः कर्तुं शक्यः, मुख्यार्थस्य बाधितस्थल एव तदौचित्यात्। प्रकृते वा सदृशरूपो वादिशब्दस्य मुख्योऽन्वयबाधो नास्तीति कृत्वा व्यञ्जनावृत्तिरेव शरणम् ईदृशार्थबो-धने। अयमर्थो न प्रमाविषयतामधिरोहति इति तु न वाच्यम्, भगवता भाष्यकृते वास्यार्थस्य महता संरम्भेण वोधितत्वात्। अपि चात्रैव सूत्रे शब्दतः स्फूटं व्यञ्जनयाः समर्थनं क्रियते भाष्यकारेण। तथाहि-'अथवा नान्तरेण क्रियां भूतभविष्यवर्तमानकाला व्यज्यन्ते। अस्त्यादिभिरपि भूतभविष्यद्वर्तमानकाला व्यञ्जन्ते' इति। अत्र व्यज्यन्ते' इत्यस्य व्यञ्जनया बोध्यन्ते इत्यर्थः सुस्पष्टं प्रतीयते।

एवमेव 'आरोपितत्वं नञ्द्योत्यम्' द्योतकाः प्रादयो येन' इत्यादिकया भट्टोजिदीक्षितोक्त्या, वैयाकरणसिद्धान्तलघुमञ्जूषायामेतत्समर्थने श्रीनागोजिभट्टोक्त्या किञ्च व्यर्थ सद् यद्यत्सूत्रं पदं वा ज्ञापकमुच्यते, तत्सर्वव्य नञ्जकमेव शब्दप्राणपर्यालोचनायाम्' इति अस्याः स्वीकारे कलाटीकाकृता श्रीबालंभट्टानां युक्तयः।

लघुमञ्जूषायाः कलाटीकायां श्रीबालंभट्ट एतत्समर्थने वह्वीर्युक्तीरुपस्थापयामासुः। तथाहि- 'गतोऽस्त्यमर्कः' इत्यादौ न व्यञ्जना प्रतिष्ठां लब्धुं योग्या, एकसम्बन्धिज्ञानादपर-सम्बन्धिस्मरणवत् स्मृतिरेव तं तमर्थविषयीकरिष्यति- इति, तन्न रमणीयतामर्हति, उक्तवाक्यश्रवणोत्तरं सन्ध्यावन्दनं कर्तव्यमिति मया स्मृतम् इत्यनुव्यवसायो न भवति, तत्तया उल्लेखोऽपि न भवति स्मृतौ तु ततोल्लेख आवश्यक- इदं पदं वाक्यं वा एतदर्थस्य च वाचकम्, न लक्षकम्, नाऽपि स्मारकम्, अपि तु व्यञ्जनया बोधकमिति प्रामाणिक-व्यवहारेण शक्त्यादिव्यतिरिक्तायाव्यञ्जनाया अभ्युपगमाच्च। मुख्यार्थसम्बन्धस्याप्यनया बोधदर्शनाच्च इति।

**अस्याः स्वरूपनिर्वचने श्रीनागोजिभट्टानां विलक्षणं कृत्यम्-** सिद्धान्तलघुमञ्जूषायामेतत्स्वरूपनिरूपणावसरे संस्कारविशेषो व्यञ्जना इत्यूचिरे श्रीनागोजिभट्टाः। संस्कारे विशेषस्त्रिधा उक्तस्तैः। तथा च- यथा लक्षणाया मुख्यार्थबाध-ग्रहपूर्वकमेव बोधो भवति, तथात्र, न भवति, मुख्यार्थस्य बाधग्रहो भवतु वा न भवतु, अनया तु बोधो जायत एवेति। मुख्यार्थवाधग्रहनिरपेक्षबोधजनकत्वं संस्कारे प्रथमो विशेषः। लक्षणया तु मुख्यार्थसम्बद्धस्येवाप्रसिद्धस्येव वा बोधो भवति, अनया तु स नियमो न समादृत इति मुख्यार्थसम्बन्धासम्बद्धसाधारणप्रसिद्धार्थविषयकत्वमुक्तसंस्कारे द्वितीयो विशेषः। उक्तसंस्कारस्योद्बुद्धानुद्बुद्धत्वसाधारण्ये सर्वत्रेण सर्वेषामनया बोधः कथं न भवति, इत्यतिप्रसक्तिवारणाय वाक्यादिवैशिष्ट्यज्ञानस्येतज्जन्यबोधे सहकारिताऽभ्युपेयत इति वक्त्रादिवैशिष्ट्य ज्ञानप्रतिभाद्युद्बुद्धत्वमपि तत्र तृतीयो विशेष इति।

अत्रोच्यते- एषा संस्कारविशेषरूपा व्यञ्जना न्यायदर्शने समवायसम्बन्धेनात्मनि तिष्ठेत् वेदान्तदर्शने तादात्म्यसम्बन्धेनान्तःकरणे निवत्स्यतीति शब्दतदर्थयोरुभयोरप्य-विद्यमानतया तयोरस्याः कथं सम्बन्धता स्यात्? सम्बन्धस्योभयवृत्तित्वनियमात्। अस्यां परिस्थितो न्यायशास्त्राभ्युपगताया इच्छायाः शक्तित्वाङ्गीकारे तस्याः पदपदार्थयोः सम्बन्धत्वाभावरूपं दूषणे पूर्वं भवद्भिरेवोद्भावितं तार्किकाणां शिरस्सु स एव दोषोऽधुनोक्तसंस्कारस्य वृत्तित्वसमर्थकानां भवतां शिरस्यापतितः कथं दुरीकर्तुं शक्यम् इत्यहो विलक्षणं कृत्यं भवतां मान्यवराणाम्।

**उक्तविषये समन्वयप्रकारः-** व्यङ्ग्यव्यञ्जकभावसम्बन्धरूपेव व्यञ्जना मन्तव्या, संस्कारविशेषस्य तु तज्ज्ञापकतया तस्मिन् ज्ञापके हेतो व्यञ्जनापदस्य व्यवहारो लक्षणयाऽप्रसिद्धशक्त्या वा। अनुभूयते च क्वचित् कार्ये क्वचिच्च कारणे एकस्येव एकस्येव शब्दस्य प्रयोगः। यथा शक्यसम्बन्धेन कारेण लक्षणापदस्य व्यवहारो भवति न्यायशास्त्रे, शक्यताऽवच्छेदकारोपात्मके तत्फले लक्षणाशब्दस्य प्रयोगो भवति व्याकरणशास्त्रे। उच्यते च स्वयमपि द्योतकत्वं च क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वम् इति। एतनोक्तस्य व्यङ्ग्यव्यञ्जकभावसम्बन्धस्य व्यञ्जनापदेन ग्रहणं शब्दस्थले स्पष्टं सूचितमस्ति। अपि च तदा दीपे प्रकाशकत्वशक्तावपि घटादिभिः संयोगसम्बन्धे सत्येव तस्याश्चरितार्थता वक्तुं शक्या, नान्यथा, तथैव शब्दे व्यङ्ग्यव्यञ्जकभावसत्वेऽभ्यर्थेन सह सद्भिन्नस्य तादृशसंस्कारविशेषविषमत्वस्य सत्येव तच्चरितार्थता। उक्तञ्च 'उपकारः स यत्राऽस्ति धर्मस्तत्रानुगम्यते' इति।

नन्वर्थबोधात् प्राक्कथनस्य व्यङ्ग्यव्यञ्जकभावसम्बन्धस्य ज्ञानम्? एतज्ज्ञानमन्तरा च कथमर्थविशेषविषयकः शाब्दबोध इति चेत्, अत्रोच्यते- वाच्यवाचक-भावसम्बन्धवदस्याप्यनादितया दोषाभावात्। एतच्च पदविषयकव्यञ्जनाविषये, वाक्यगता व्यञ्जना तु स्वरूपवती एव शाब्दबोधजनिका, वाक्यनिष्ठशक्तिसम्बन्धवतः।' अत एवोक्तं कलाकृद्भिः' व्यञ्जना स्वरूपसती हेतुः इति।

**वाक्यनिष्ठाशक्तिरभिज्ञातेव बोधहेतुः -** पदार्थदृष्ट्या वाक्यगताशक्तिरपि ज्ञाता सत्येव शाब्दबोधे जनयतीत्येव सिद्धान्तः । अत्रेयमाशङ्का जागर्ति यद् वाक्यार्थस्य वाक्याशक्त्यैव ज्ञातत्वे तस्या पूर्वत्वं भज्येतेति चेत्, अत्रेत्थं पर्यालोच्यते- पदार्थांशे पदस्य शक्तेः सत्वेन पारिशेष्यादन्वयांश एव वाक्यशक्तिः पर्यवस्यति। तत्रान्वयसामान्ये सा शक्तिः, अन्वयविशेषस्तु समभिव्याहाररूपाकाङ्क्षा-ज्ञानेनैव लभ्य इत्यन्विताभिधानवादिमतवदेतस्योपपत्तिः।

यदि तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमशक्तिग्रह: प्रश्चात्तत्पद आवापेनोद्वापेन च तद्ग्रह इति शाब्दिकानां राद्धान्तेनोक्तव्यवस्था न सम्भवतीति उच्यते तदा श्रीनागोजि-भट्टसिद्धान्तमनुसृत्य मध्ये स्मृतिरूपाया वाक्यार्थोपस्थितेरसम्भवेन व्यापारतयानपेक्षणेन चेष्टं साधनीयम् स्फुटीकृतश्चायमाशयो दर्पणकृताऽपि।

वाक्यार्थज्ञाने पदार्थज्ञाने व्यापार इति भाष्यमतं तु प्रक्रियाकल्पे पदार्थोपस्थितिविषया जायमाने वाक्यार्थबोध एवेति न तत्पदाद्विरोध:। वाक्यनिष्ट-शक्तिज्ञानेन वाक्यार्थस्य स्मरणमेव कुतो न स्वीक्रियते? एकसम्बन्धिज्ञानमपरसम्बन्धिन: स्मारकमिति नियमादिति तु न शङ्कनीयम् एकसम्बन्धिज्ञानं उद्बुद्धसंस्कारमात्रेणापरसम्ब-न्धिनं स्मारयति, अत एव धूमज्ञानेन व्याप्तिज्ञानसहकृतेनाग्रेरनुमितिरेव भवति, न त्वकसम्बन्धिज्ञानविधयाऽपरसम्बन्धनोऽग्रे: स्मृति:।

एवमेवात्र वाक्यशक्तिपक्षेऽपि 'सैन्धवमानय' इत्यादिनानार्थकस्थल एकतरार्थविषयबोधोत्पत्यै तात्पर्यज्ञानस्यापि सहकारिताया स्वीकारेणोक्तशङ्का नोपस्था-तुमर्हति। शब्दानां स्वरूपेऽर्थेऽपि शक्तिरिति शाब्दिकसिद्धान्तेन घटोऽस्ति, इत्यादिस्थले-ऽप्यर्थद्वयविषयकबोधे सम्भावनायां सर्वत्रैव तात्पर्यग्रहस्य हेतु तयाऽपेक्षितत्वेन संस्कारमात्रस्य हेतुत्वाभावान्नास्ति वाक्यार्थस्य स्मृतित्वाशङ्का। एवं च वाक्यनिष्ठशक्तेर्ज्ञानस्य हेतुत्वे सिद्धान्तिते वाक्यनिष्ठव्यञ्जनाया अपि ज्ञानमेव वाक्यार्थबोधे हेतुत्वेन स्वीकरणीयम्।

**व्यञ्जनाया: स्वरूपसत्या हेतुत्वे कलाकृत्सम्मति: -** व्यङ्ग्यार्थस्यानेशत्येन शब्देन सहानादिसम्बन्धासम्भवेन संस्कारविशेषस्येव व्यञ्जनात्वपक्षेण च पदे वाक्ये च सर्वत्र स्वरूपसती एव व्यजना हेतु:। एतावता शाब्दबोधात् प्राक् कथं व्यङ्ग्यव्यञ्जकभावरूपसम्बन्धस्य ज्ञानमिति शङ्काया उद्यानमेव न भवति। अत एवोक्तमनुपदमेव व्यञ्जनया: स्वरूपसत्या हेतुत्वं कलाकृद्भि: 'शक्तिरेतज्जन्मगृहीतेव बोधहेतु:, व्यञ्जना तु जन्मान्तरगृहीताऽपि। इत्यपि शक्तेरस्याभेदकत्वम्। इदमेवाभिप्रेत्य व्यञ्जना स्वरूपसती हेतुरिति प्रवाद:। अतिरिक्ताया व्यञ्जनाया: पदार्थान्तरत्वस्य स्वरूपसत्याऽन्वयबुद्धो तद्धेतुताया: प्रमाणाभावेनासत्वाच्चेति श्रीजगदीशतर्कालङ्कारमतेनाऽप्येतत्प्रत्येतुं शक्यते यद् व्यञ्जनावादिमते स्वरूपसत्या एव तस्या: शाब्दहेतुत्वस्याभ्युपगम इति।

**वस्तुतस्तज्ज्ञानस्य हेतुत्वेऽपि न कश्चन विरोध: -** व्यङ्ग्यव्यञ्जकभावसम्बन्धस्य व्यञ्जनात्वमते तस्य ज्ञानं शाब्दबोधे हेतुतयाऽभ्युपेयते। यथा 'लक्षणेत्थं भूताख्यान' इति सूत्रोदाहृतस्य वृक्षं प्रति विद्योतते विद्युत् इत्यस्य वृक्षसम्बन्धिविद्यो-तनमित्यर्थ: प्रादर्शि मनोरमाकृता। तत्र वृक्षविद्योतने शक्यार्थो लक्ष्यलक्षणभावसम्बन्धश्च प्रतेर्द्योत्योऽर्थ:, तस्य वृत्तिजन्योपस्थितेरभावे कथमन्यबोध: स्यादिति तत्र व्यञ्जनाया ज्ञानमावश्यकम्।

एवमेव 'सर्पिषोऽपि स्यात्' इत्यत्र विन्दूरूपेऽर्थेऽपिशब्दस्य व्यञ्जनावृत्ति: तस्या ज्ञानेनैव विन्दूरूपार्थस्योपस्थिति:, तद्विषयक: शाब्दबोधश्च। अपि शब्दस्य कर्मप्रवचनीयभेदे प्रक्रियापक्ष इदमेवोचितम्। ध्वनितं चैतत् - 'अपि पदार्थ' इति सूत्रव्याख्यावसरे सिद्धान्तकौमुद्यां लघुशब्देन्दुशेखरे च।

किञ्च शाब्दबोधे वृत्तिविशिष्टज्ञानस्य हेतुत्वं वदद्भिर्मञ्जुषाकारैरस्य ज्ञानस्य हेतुता स्पष्टं प्रतिबोधिता। अन्यथा लक्षणा या: शक्तिरूपत्वे व्यञ्जनाश्च स्वरूपसत्या एव हेतुत्वे तत्र वृत्तिपदं निष्प्रयोजनं स्यात्, शक्तिविशिष्टज्ञानमेव हेतुतया वचनीय स्यात्। अतश्च प्रकृतिप्रत्ययपदान्यतमशब्दस्थलेऽज्ञाताया: वृत्तेरनुपभोगे ज्ञाताया एव व्यञ्जनाया हेतुता। अन्यत्र त्वस्तु नाम स्वरूपसत्या: कारणता इति विचारयन्तु सूधिय:।

किञ्चानुमानेनार्थापत्या लक्षणाज्ञानेन वा एषा गतार्था इत्यभ्युपेयते न्यादर्शनविद्भि: ततोऽप्यायाति पदस्याज्ञानमेव शब्दे प्रतिकारणमिति। न हि ज्ञानस्य प्रतिविधानं ज्ञानाद विजातीयेन कर्तुं शक्यते।

**व्यञ्जनालक्षणे आलङ्कारिका :-** रसरूपस्यात्मनोऽभिव्यक्त्यर्थमङ्गीकृताऽऽलङ्कारिकै: स्वप्राणभूतेव व्यञ्जनाख्या शब्दवृत्ति:। एतस्या लक्षणमनेकत्र स्थलेषूल्लिखितं तदनुगामिभि:। यथा च काव्यप्रकाशटीकाकारेण श्रीवामनाचार्येण 'व्यञ्जना च शक्तिलक्षणाजन्यप्रतीतिजनक: पदादिगतो व्यापार: इत्युक्तम्। श्रीहरिदासभट्टाचार्येणाऽपि वाच्यादिभिन्नार्थप्रतिपादकत्वे सति वृत्तित्वमितिलक्षणमुक्तम्। वस्तुत: शब्दमात्रेण भिन्नार्थत: पूर्वचर्चितमेवेतल्लक्षणम्। मूलग्रन्थत एवेदं लक्षणं लभ्यते। तथा च-

**विरतास्वभिधाद्यासु ययाऽर्थो बोध्यतेऽपर:।**

**सावृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।। इति।**

स्वकार्यसम्पादनेन शब्दस्य ज्ञानस्य क्रियायाश्च व्यापारसकृदेव क्षीणसामर्थ्येन भवतीति कार्यान्तरार्थं पुनरन्यो व्यापाराऽपेक्ष्यत इति नियमेनाभिधादीनां निवृत्तौ सत्यां व्यञ्जनाख्यो व्यापार आश्रीयते। व्यञ्जन-धनन-गमन-प्रत्ययिनादिशब्दैरप्ययं व्यापार: सङ्कीर्तितो भवति।

**प्रस्थानरत्नाकरकृतां मतेऽस्या लक्षणम् -** 'लक्षणास्थले फलप्रत्यायिका, नियतशक्त्यनेकार्थस्थले विवक्षितातिरिक्तवाच्य-प्रत्यायिका वृतिव्यञ्जना इति स्थलभेदेन लक्षणद्वयमुक्तं प्रस्थानरत्नाकरे गोस्वामी श्रीपुरुषोत्तममहाराजेन।

**रत्नप्रभाकृत्सम्मतमेतल्लक्षणम् -** वचनादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थधीस्तद्धेतु व्यापारत्वं व्यञ्जनात्वम्' इति।

**अत्र निष्कर्ष: -** अलङ्कारशास्त्रोक्तं लक्षणं भेदघटिततया प्रतियोगिज्ञानापेक्षयिति गुरुशरीरम्। मदुक्तलक्षणामेक्षया। किञ्च व्यावृत्तिव्यवहारो वा लक्षणस्य प्रयोजनमिति लक्षणेन लक्ष्ये स्वेतरभेदसाधने अंशत: सिद्धसाधनदो-षोऽपि। किञ्च शब्दार्थयो: सम्बन्धविशेषो अञ्जनानाम्। स चावश्यं केनचिन्नाम्ना व्यपदेश्य इत्यादि मदूहितलक्षणेनैव पूरयितुं शक्यते।

श्रीगोस्वामिकृतं लक्षणं त्वननुगमदोषग्रस्तमेवेति कथं समादरार्हं स्यात् तृतीयमपि रत्नप्रभालक्षणं तत्तत्पदघटितत्वेनानुगतमेव।

**व्यञ्जनावृत्तेर्भेद समीक्षा-** एषा: वृत्ति: शक्तिवृत्तिरिव न शब्दमात्रनिष्ठा, अपितु मतान्तरीय लक्षणावदर्थनिष्ठापीति द्विविधा। तत्रापि आद्या प्रकृति प्रत्ययपदवाक्यनिष्ठतया चतुर्विधा।

यथा- 'द्योतिका वाचिका वा स्युद्वितवदीनां विभक्तय:' इति सिद्धान्तेन यदा तु अमादिविभक्तीनामेकत्वादि संख्याद्योतकत्वम्, तदा प्रकृतिस्तद् वाचिका। यदा तु अमादयस्तद्वाचका: तदाघटादिप्रकृतयस्यद्द्योतिका:। पदस्य द्योतकत्वं तु परिभवतीत्यादौ भू धातो: परिभवाद्यर्थवाचकत्वं परैरुपसर्गस्य तद्योतकत्वं प्रसिद्धमेव।

प्रकारान्तरेणाप्येषा द्विविधा

एषा शाब्दी व्यञ्जना अभिधामूला, लक्षणमूला चेति द्विविधा। तत्राद्या नियन्त्रितान्यार्थविषयकबोधजनिका। यथा- दुर्गालङ्घितविग्रहोराजत्युमावल्लभ:। इत्यत्रो-मावल्लभशब्दस्योमा नाममहादेवी वल्लभभानुदेवनृपतिरूपेऽर्थे प्रकरणेन नियन्त्रिते व्यञ्जनयेव पुन: गौरीवल्लभरूपोऽर्थ: प्रत्याय्यते।

यतु नियन्त्रितार्थविषयकबोधजनकत्वमस्या लक्षणमधुना कलाटीकायां तदनुन-तायां रत्नप्रभायां च लभ्यते। तत्तु मन्ये मुद्रणयन्त्रदोषदुष्टम्। आदावकारस्य मध्येऽन्य-शब्दस्य वाऽमुद्रणात्। किं वा प्राग्रूपशोधकस्येवायं दोष:। नियन्त्रितार्थस्य त्वभिधयैव बोधात् तदन्यस्यैव चानया प्रकाशनात्।

लक्षणामूला तु 'गङ्गायां घोष:' इत्यादौ प्रसिद्धेव। तत्र हि शक्त्या गङ्गापदं प्रवाहविशेषं बोधयित्वा विरतम्। लक्षणया च तीरस्य बोध:। ततो विरतयो: शाब्दीलक्षणोर्व्यञ्जनया तीरे शैत्यपावनत्वातिशयस्य बोध इति प्रयोजनवतीषु लक्षणासु सर्वत्र एवमेव प्रयोजनप्रतिपत्यर्थं लक्षणामूला व्यञ्जना समाप्रियते। तथा चाभियुक्तोक्ति:।

**लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।**
**यथा प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणा यया।।**

**चेष्टानिष्ठापि व्यञ्जना वस्तुत: शब्दनिष्ठेव-** बालमूकादीनां चेष्टयेव व्यवहारो दृश्यत इति चेष्टानिष्ठापि एषा व्यञ्जना स्वीक्रियते तेषां शब्दज्ञानाभावात्। वस्तुस्तु तेषामपि जन्मान्तरीयशब्दस्मरणेन तत्रापि शब्दनिष्ठेवैषा, न तदभिन्नेत्यपि परेषां मतम्। स्फुटीकृतञ्चैतत् सर्वं गुरुमञ्जूषादौ इति कलाकृद्भिरुक्तम्।

**अर्थनिष्ठाया व्यञ्जनाया समीक्षा-** वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनाम् अन्यार्थधी: तद्धेतु व्यापारोऽर्थनिष्ठा व्यञ्जना। शब्दनिष्ठव्यञ्जनया तु नैषा गतार्थां भवितुमर्हति। तथा च-

**रविजाले विलोक्य धीनाभिपद्मे पितामहम्।**
**रसाकुला छादयते दक्षिणां नयनं हरे:।।**

इत्यादौ हरिपदसन्निधानेन दक्षिणनयनं सूर्यात्मकम्। तत्सङ्कोचेव सूर्यस्यास्तत्वम्, तेन पद्मस्य संकोचस्ततश्च पितामहस्य (ब्रह्मण:) गमनम्। तेनाप्रतिबद्धं रतिविलसितम् इति क्रमेण व्यङ्ग्येषु प्रतीयमानेषु तत्तदर्थप्रतीत्युत्तरमेव व्यङ्ग्यार्थप्रतीति: एवञ्चार्थनिष्ठापि व्यञ्जनामन्तव्येव। एतल्लक्षणविषये इयमुक्ति: -

**वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधे:।**
**प्रस्तावदेशकालादेवैशिष्ट्यात् प्रतिभाजुषाम्।।**
**योऽर्थस्यान्यार्थधीहेतुव्यापारो व्यक्तिरेव सा।**

इति कारिकामुद्धृत्य कलाटीकायां बोद्धव्यादीनां समेषां लक्षणं निरूपितम्। अलङ्कारग्रन्थेषु चेयं विस्तरेण प्रपञ्चिता वर्तते। अत्र त्वस्या अर्थनिष्ठाया व्यञ्जनाया नातिप्रपञ्च: क्रियते। स्वनादिगताया अप्येषैव स्थितिर्द्रष्टव्या। एते सर्वे भेदा लधुमञ्जूशायां निरूपिता: सन्ति।

**व्यञ्जनाया: शक्तौ लक्षणायामन्तर्भावविमर्श:-** सा चेयं व्यञ्जना शक्तिमूला शक्तौ लक्षणमूला च लक्षणायामेव यद्यन्तर्भूता स्यात्, तर्हि स्वतन्त्रता कथं स्यादिति चेत्, उच्यते - 'राजत्युमावल्लभ:' इत्यादावप्राकरिणकद्वितीयार्थबोधान्निष्कम्पं प्रवृ-त्यभवेन

तस्यास्वादविशेषजनकत्वेन च तत्र वैजात्यमवश्यं वाच्यमिति तस्य बोधस्य कारणविशेषेणैव सिद्धिवाच्या स्यादिति व्यञ्जनास्यावृत्तिरियम् अवश्यमङ्गीकरणीया प्रेक्षावद्भि:। अत एव व्यञ्जनामात्रं शक्त्या न गतार्थो कर्तुं शक्यते। किञ्च व्यञ्जना सहृदयमात्रहसंवेद्या, शक्तिस्तु तदन्यैरपि इति बोद्धृभेदात् द्वयोर्भेद:। 'गतोऽस्तमर्क:' इत्यादौ शक्योऽर्थएकैव, व्यङ्ग्यस्तु प्रतिभा वैशद्येन इति कारणभेद: एवमेव कार्य प्रतीतिकालाश्रय विषययादीनामपि भेदाद्भेद:।

तथा च शक्तेर्ज्ञानम्। शाब्दे हेतु:, व्यञ्जना तु स्वरूपसती अपि इति महान् भेद इति सा शक्तावन्तभावयितुं न शक्या, नापि च लक्षणायां गतर्था एषा। तथाहि यद्वद् 'गङ्गायां घोष' इत्यादौ गङ्गाशब्दो जलप्रवाहविषये सवाध इति तटं लक्षयति, तथा तटेऽपि सबाध: स्यात् तदा शैत्यादिकं लक्षयेत्। तत्तु न सम्भवति नहि तटो मुख्योऽर्थ। नाप्यत्रबाध: नापि न तटस्य लक्षणीयै: शैत्यादिभि: साक्षाद् सम्बन्ध: नापि प्रयोजने लक्ष्ये किञ्चिद् प्रयोजनमिति बाधादिकमनपेक्ष्य गङ्गाशब्दस्तमिव प्रयोजनं प्रतिपादयितुं कथमिव लक्षणया समुत्सहेत्? तथा च प्रत्ययादि श्रीमम्मटाचार्येण -

**प्रयोजनेन सहितं लक्षणीयं न विद्यते।**
**ज्ञानस्य विषयो ह्यन्य: फलमन्यदुदाहृतम्।। इति**

एवञ्च प्रयोजनस्य लक्ष्यत्वे तीरादेर्लक्ष्यस्य मुख्यार्थत्वं बाधितत्वञ्च स्यात्। प्रयोजनस्यापि च लक्ष्यतया प्रयोजनान्तरम्, तस्यापि प्रयोजनान्तरमित्थमनवस्था स्यादित्यपि दोष: साहित्यदर्पणकृतोक्त:।

**व्यञ्जनाया अस्वीकारे मतान्तरविमर्श:-** 'मुखं विकसितस्मितम्' इत्यादौ विकाशस्य मुखे बाधाल्लक्षितार्थस्य विस्तृत-स्यान्वयबोधोत्तरं मुखे कुसमतुल्यसौरभवतायाश्चमत्कृतिरमणीयताया वा बोधो मानस-लौकिक प्रत्यक्षरूप: स्मृतिसन्निकृष्ट एवेति कृत्वा श्रीजगदीशतर्कालङ्कार श्रीहरिनाथभट्टा-चार्यादयो विद्वांसो व्यञ्जनावृत्तिं न स्वीकुर्वन्ति।

'गामानय' इत्यादिवाक्यादपि मानस एवायं बोध: स्यादिति शक्यादेर्वृत्तिकल्पनं व्यर्थमेवेति चेन्न, वृत्योपस्थितपदार्थादतिरिक्तस्यार्थस्य शाब्दबोधे प्रतीतिमां भूदिति तस्य नियन्त्रितविषयकत्वस्यावश्यकतया तत्रोक्तमानसत्वायोगात्।

किञ्चैवं व्यञ्जनाया: हेतुत्वे न केवलं सहृदय समुदायस्य, अपि तु सर्वस्यैव (आपामरविद्वज्जनस्य) सर्वदा बोध: स्यात्। ज्ञातस्यास्तत्वे तु शक्तिग्राहकव्यवहारादिवत् तद्ग्राहकस्यापि वचनीयता आपतेदित्यद्यपि कथयन्ति।

अन्यच्च 'दूरस्थाभूधरारम्या:' इत्यादौ नानार्थस्थले भूधरपदेन नृपतीनामपि बोधशक्त्यैव भवतीति शक्तिमूलया व्यञ्जनाया: शक्तौ, लक्षणामूलायाश्च लक्षणायाम्, द्वयोश्च क्वचिदनुमानेऽन्तर्भावं विधाय न्यक्कुर्वन्ति व्यञ्जनां मुक्तावलीटीकाकृत: एवं 'गङ्गायां घोष:' इत्यादौ शैत्यपावनत्वातिशयविशिष्टस्य तीरस्य लक्षणयेव बोध:। तथा च-

गच्छ गच्छसि चेत् कान्तपन्थान: सन्तु ते शिवा:।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्।।

इत्यादावर्थशक्तिमूलव्यञ्जनया व्यज्यमाना: कान्तगमनोत्तरकालिकान्ताप्राणवियोगादयो-ऽर्था:। एषा मद्गमनोत्तरं प्राणवियोगवती भविष्यति, ममापि जन्येत्यादिविलक्षणशब्द-प्रयोगवतीत्वात् या नैवं सा नैवम्, यथा एवच्छब्दभिन्नशब्दप्रयोक्त्री कामिनी इत्यनुमित्येव बोधनीया, इत्युदाहरन्ति।

श्रीमहिमभट्टमहोदया अप्यनुमान एवास्या अन्तर्भावं स्वीकुर्वन्ति। तथाहि 'विभावादिप्रतीति: रसादिप्रतीते: साधनमिष्यते। ते विभावादय: हि रत्यादीनां भावानां कारणकार्यसहकारिभूतास्ताननुमापद्यत एव रसादीन् निष्पादयन्ति। त एव हि प्रतीयमाना आस्वादपदवीं प्राप्ता: सन्तो रस उच्यन्ते इत्यवश्यम्भावी प्रतीतिक्रम: केवलमाशु-भावितयाऽसौ नानुभूयते, यतोऽयमद्याप्यभिव्यतिक्रम' इति।

'गङ्गायां घोष:' इत्यादौ तात्पर्यवृत्यैव शैत्यपावनत्वादिः प्रतीयते। वक्तृगतं तात्पर्यं शब्दे आरोप्य तस्य शब्दवृत्तित्वं वृतित्वं निर्वाहाम्। व्यञ्जनाया वृत्तित्वत्वशलीलस्थले इवात्रापि केशवालुकादैरपि प्रतीति: स्यात्, तद्वारणाय तात्पर्यवृत्तेस्तवाप्यावश्यकत्वे तद्धेतुन्यायेन व्यञ्जनावृत्तेर्निष्प्राणत्वमेवेत्याद्युपपादयन्ति। प्रस्थानरत्नाकरकारा:।

अद्वैतवेदान्तिनस्त्वर्थापत्तिप्रमाणेनैव व्यङ्ग्यार्थबोधमुपपाद्य व्यञ्जनावृत्तिमुत्सारयन्ति।

**व्यञ्जनाविषये मीमांसकमतसमीक्षा -** काव्ये सहृदयहृदयानुभवसिद्धं ललनालावण्यरमणीयं ध्वन्यमानमर्थमवगमयितुं शास्त्रसिद्धाभिधैव प्रभवतीति मीमांसका महता संरम्भेणातिष्ठन्ते। इयं तेषां मतसरणिर्ध्वनिवादिभिराचार्यैर्ध्वन्यालोकलोचनकाव्यप्रकाशादिषु ध्वनिप्रस्थानसंस्थाप-केष्वाकरभूतेषु ग्रन्थेषु पूर्वपक्षरूपेणोपनिबद्धा। अत्र तावत्सर्वप्रथमं भाट्टमतोपजीविनाम-भिहितान्वयवादिनां दर्शनमुपस्थापयाम:।

**1. अभिहितान्वयवादिनां भाट्टमीमांसकानां मतम् - तत्खण्डनञ्च -** पदार्था: प्रथममभिधयाऽभिधीयन्ते, पश्चाच्च ते परस्परमन्विता भूत्वा विशिष्टरूपं वाक्यार्थमधिगमयन्तीत्याकारको भट्टानामभिहितान्वयवाद:, शाबरभाष्यस्याधस्तनां पंक्तिमुपजीव्य प्रवर्तते- ''अमूनि

पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि अथेदानीं पदार्था अभिहिता: सन्तो वाक्यार्थमवबोधयन्ति।' पार्थसारथिमिश्रवाचस्पतिमिश्रादिभि-राचार्यैर्न्यायरत्नमालातत्त्वबिन्द्वादिषु परमप्रौढेषु ग्रन्थेषु भट्टानां मतमिदं सविस्तरं प्रपञ्चितम्।

भाट्टानां मते प्रथममभिधया घटपटादीनां शब्दानां घटत्वपटत्वरूपा: सामान्या अनन्विता अर्था अभिधीयन्ते। पश्चाच्च आकांक्षासत्तियोग्यतामहिम्ना सामान्यानामर्थानां विशिष्टे प्रातिस्विकेऽर्थे पर्यवसानम्। तेन च वाक्यार्थधी: समुदेति। यथोक्तं वाचस्पतिमिश्रमहोदयै: स्वकीये तत्त्वबिन्दौ -

तथा च तेऽर्था: क्रियादय: स्वसामर्थ्येन स्वरूपमात्रेण पदैरभिहिता विना कारका-दिभिरपर्यवस्यन्तस्तदाकांक्षायोग्यतासत्तिसहकारिणो वाक्यार्थधियमादधतीति युक्तम्।

**अयमाशय:-** ''रामो ग्रामं गच्छती''त्यत्र रामकर्तृकग्रामकर्मकगमनानुकूलो व्यापार इति यादृश: शाब्दबोधो भवति, तत्र शब्दस्य केनापि व्यापारेण भाव्यम्। तत्राभिधया रामत्वादीनां सामान्यानामेव बोधो भवति। परं न तावता वाक्यार्थधीसमुल्लास:। अत: रामशब्दस्य रामोऽर्थ:, ग्रामशब्दस्य ग्रामोऽर्थ:, अम्प्रत्ययस्य च कर्मता, रामकर्तृकग्रामकर्मकगमना-नुकूलो व्यापार इति वृत्तिरूपोऽन्वितोऽर्थस्तु न कस्यापि। अतोऽपदार्थोऽपि वृत्तिरूपोऽर्थ आकांक्षासन्निधियोग्यतावशादभिधाभिन्नया लक्षणया शब्दवृत्त्या भासते। एवं सति पदान्तरार्थैर्विशेषणभूतैर्यो विशिष्टोऽर्थ: प्रत्यायते। स एव हि नाम सर्वेषां पदानां वाक्यार्थ:।

तौतातिकानां भाट्टानां मते पदस्य शक्ति: स्वभावतो जातौ, जातेरदृश्यत्वात् व्यवहारोऽनुपपन्नत्वाच्च लक्षणया व्यक्तिर्गृह्यते। तथा सति गोशब्दाद्यथा व्यक्तेर्भानं लक्षणासमुल्लास्यम्, तथैव लक्षणयैवासंसृष्टानामर्थानां विशिष्टेऽर्थेऽन्वयनिर्वाहाद्वाक्यार्थधी: समुदेति। अतोऽन्वयसाधिका वृत्तिर्लक्षणा भाट्टानां शास्त्रे, न तु तात्पर्यनाम्नी वृत्ति:। परं मम्मटमटप्रमुखैरालंकारिकैरभिहितान्वयवादनिरूपणप्रसंगे सुसृष्टानामर्थानामन्वयसाधि-का वाक्यार्थधीजननी शक्तिस्तात्पर्यवृत्तिनाम्ना प्रोद्घोषिता, लक्षणा तु सर्वथा निरवकाशी-कृता परं पूर्वोक्तकुमारिलभट्टवाक्यजातपर्यालोचनेन आलंकारिकाणां सर्वमिदं वचनं विरुद्धं प्रतिभाति।

यतो हि- मीमांसाशास्त्रे भट्टमीमांसकै: स्वसिद्धान्तं स्फुटीकुर्वद्भि: काचिदपि तात्पर्यनाम्नी वृत्तिर्व्यतिरिक्तानां पदार्थानां संसर्गसाधनक्षमा नामग्रहं नोट्टङ्किता। पर विचक्षणैर्विपश्चिद्भिरभिनवगुप्तमम्मटप्रभृतिभिरन्यैरपि विश्वनाथादिभि: तात्पर्यवृत्तिरन्वि-तानामर्थानां संसर्गबोधिकेति भाट्टानां मतमभिहितान्वयवादनिरूपणप्रसंगे व्याहृतम्। एवमालंकारिकाणां मते संसर्गसाधिका या तात्पर्यवृत्तिरसौ भाट्टानां मते लक्षणा।

वस्तुतस्तु - या तात्पर्यशक्तिर्विश्वनाथप्रभृतिभिरभिहितान्वयवादविवेचनसमये प्रोक्ता तस्या: प्रोद्घोषकस्तु तार्किको जयन्तभट्ट:। यथोक्तं तेन न्यायमञ्जर्याम् -

**अभिधात्री मता शक्ति: पदानां स्वार्थनिष्ठता।**
**तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधि:।।**

जयन्तभट्टाचार्येण कथं वाक्यार्थधीर्भवतीति गहनं विमृशता अभिहितान्वयवादान्विता-भिधानाभिधं मीमांसकमतद्वयं सूक्ष्मेक्षिकया निरीक्षमाणेन संसर्गावगमार्थं तात्पर्यवृत्ति-रेवैषणीयेति सिद्धान्तितम्।

परतश्च ध्वनिमार्गानभ्युपगन्तृभि: आचार्यै: तात्पर्यवृत्ति: व्यङ्ग्यमर्थं द्योतयितुं न प्रभवतीति तस्या अपलाप: कृत:। एवं ध्वनिवादिभिराचार्यैरभिहितान्वयवादनिरूपणप्रसंगे तार्किकानां तात्पर्यवृत्तिर्भाट्टमतेऽनुप्रवेशिता। इत्थं जयन्तभट्टादीनां तार्किकानामेवायं प्रभावो यद् मम्मटभट्टप्रभृतिभिरालङ्कारिकैर्भाट्टानामभिहितान्वयवादनिरूपणप्रसंगे संसर्गबोधिका तात्पर्यनाम्नी वृत्ति: प्रतिपादिता।

भाट्टमीमांसका: ध्वनिवादिनां तुरीयां वृत्तिं प्रत्यवतिष्ठमाना मरहट्टवधूकुचाभ: प्रतीयमानोऽसावर्थ: शास्त्रसिद्ध्याभिधयैव प्रतिपाद्य इत्यभिदधति। अभिनवगुप्तमम्मट-प्रभृतिभिर्ध्वनिप्रस्थानपरमसमर्थकैराचार्यैर्युक्तिभिस्तौतिकं मतमिदं क्षुण्णम्। परमशोभा-शालिन: प्रतीयमानार्थस्य च सर्वथा व्यक्तिवेद्यत्वमेव सिद्धान्तितम्। तथा हि -

भ्रम धार्मिक विस्रब्ध: स शुनकोऽद्यमारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन।।

अस्मिन् पद्ये विधिरूपवाच्यार्थोत्तरकालिकध्वन्यमानो निषेधरूपोऽर्थो नाभिधया द्योत्यस्तस्या विधिरूपिणमर्थं प्रत्याय्योपरमणात्। तद्यथा - प्रथमायां कक्ष्यायामभिधाया: प्रसरणाद् विधिरूपिणोऽर्थस्यैव प्रतीति:, भ्रमधार्मिकेत्यादीनां पदानां तदर्थष्वेव संकेतात्, अनन्तरं वक्तृप्रतिपत्तिप्रतिभानुप्राणितोऽसावर्थो निषेधरूपो व्यङ्ग्योवाच्यार्थकख्याति-क्रान्तोऽभिधाभिन्नया एव शब्दवृत्त्या प्रतिपाद्य:। केवलमभिधायुगपद्विधिनिषेधरूपौ विरुद्धावर्थौ प्रत्याययितुं न प्रभवति।

ननु विध्यर्थं भ्रमेत्यभिधायाभिधा निषेधारूपिणमर्थमवगमयितुं पुनरुज्जीविता भवतीति विधिनिषेधरूपिणोरर्थयो: क्रमेण प्रतीतिरभिधया, अत: प्रतीयमानोऽपरोऽर्थो ध्वनिनाम्ना यो मूर्धाभिषिक्त: कृतस्तस्य प्रतीतिर्द्वितीययाभिधया क्रमेण भवतीति निर्निबन्धन एव व्यक्ति प्रत्याग्रह इति चेन्न, पदार्थानां सामान्यमर्थमभिधाय क्षीणसामर्थ्याया अभिधाया अर्थान्तरप्रत्यायनेऽशक्तत्वात्।

**अयमाशय: -** ''विशेष्यं नाभिधागच्छेत्, क्षीणशक्तिर्विशेषणे'' इति नियमनुरुध्य पदार्थरूपं सामान्यमर्थमभिधायोपरताभिधा तदा विशेष्यमन्वितं संसर्गमभिधातुं तावन्न प्रभवति, यदा वाक्यार्थबोधोत्तरकालिन्यां व्यंग्यार्थप्रतीतावभिधा प्रभविष्यतीति सर्वथा अशक्यम् अतो न क्रमेण प्रतीतिरभिधया वाच्यार्थव्यंग्यार्थयो:, वाच्यार्थकक्ष्यानवगाहिन: प्रतिषेधरूपस्य ध्वन्यमानस्यार्थस्य द्योतनार्थं शब्दस्याभिधाभिन्नो व्यापारो व्यंजनोपाह्व एषणीय एव भवति।

**अन्विताभिधानवादिनां प्रभाकरमीमांसकानां मतं तत्खण्डनञ्च-** अन्विताभिधानवादिन: प्राभाकरा अन्वितानां पदार्थानामभिधानमन्वितै: पदैरिति वदन्तोऽन्वयरूपे वाक्यार्थेऽप पदानामभिधैव शक्तिरित्यभिदधति। तेषां मते पदार्थ एव वाक्यार्थ:। अत: संसर्गबोधार्थमन्वयसाधिकाया अभिधाभिन्नाया अतिरिक्तायास्तात्पर्यवृत्ते: परिकल्पनप्रयास एव। व्यवहारेणान्वितस्यैवार्थस्योपस्थितेस्तत्रैव च शक्तिग्रहात्। अयमाशयोऽत्रानुसन्धेयोऽन्विताभिधानवादिन:। लोके प्रवृत्तिनिवृत्तिकारिक्यमेव गामा-नयेत्युत्तमवृद्धादेशाद् मध्यमवृद्धेन सास्नादिमतो गोपदार्थस्यानयनं सम्पाद्य तत्तत्पदानां तत्तदर्थेष्वनवगतपूर्वसंकेतोऽव्युत्पन्नो बाल आदौ व्यवहारादेव तेषां तेषां पदानां तान्तानर्थान् अवगच्छति। यद्यपि -

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यत: सिद्धपदस्य वृद्धा:।।**

इत्यभियुक्तोक्ते: शक्तिग्रहस्याष्टौ निमित्तानि, परं व्यवहारं एव मुख्यं कारणं शक्तिग्रहे, व्यवहारे चान्वितानामेवार्थानामुपस्थिति:, तेषामेव प्रवृत्तिनिवृत्तिप्रयोजकत्वात्। एवमुत्तममध्यमवृद्धौ शब्दमुखेन परस्परं व्यवहरन्तौ अवबुद्ध्य व्याकरणकोशाव्युत्पन्नो बालस्तत्तत्पदानां तत्तदर्थानन्वितानेव गोचरीकरोति। अनन्वितो गोत्वाश्वत्वरूप: सामान्यो-ऽर्थो न कदापि प्रवृत्तौ निवृत्तौ वा निबन्धनतामुपयाति। आनयनान्विता विशिष्टा अन्विता एव पदार्था गोत्वाश्वत्वादयो व्युत्पित्सोर्बालस्य बोधविषया भवन्ति। अतोऽन्वितेऽर्थे एव शक्तिग्रह:।

व्यवहारतो य: शक्तिग्रहो भवति, तद्घटकस्य त्रिप्रमाणकस्य सम्बन्धस्य व्याख्या साम्प्रतं प्रस्तूयते।

'गामानय अश्वञ्च नय' इत्युत्तमवृद्धो मध्यमवृद्धमादिशति। अत्रोत्तमवृद्धमुखोदीरितानां गकारमकारादीन् ध्वनीन् श्रृणोति। अनन्तरञ्च मध्यमवृद्धोपनीतं सास्नालांगूलवन्तं गोपदार्थं चक्षुर्भ्यामवलोकयति, पश्चाच्चोत्तमवृद्धमुखोच्चरितगवादिशब्दश्रवणाद् मध्यमवृद्धेन सास्नालांगूलवत् वस्त्वानीतम्, अतोऽनेनैवंविधात् पदादेवं विधोऽर्थ: अवबुद्ध इति मध्यमवृद्धकृतगवानयनरूपचेष्टया बालोऽनुमिनोति। अनुमानस्वरूपं तु 'अयमेतच्छब्दजन्यैतदर्थगोचरज्ञानवान् स तच्छब्दश्रवणानन्तरं एतदर्थगोचरचेष्टावत्त्वात्' इति। अनन्तरं तेषां शब्दानामुच्चारणेनैव गवानयनादिकं कार्यकलापं घटते, अतो गवादय-श्शब्दा: कारणानि कार्याणि च गवानयनादिरूपा अर्था:।

तत्तच्छब्दप्रयोगाभावे तत्तदर्थोपस्थितिरसम्भवा। अतो गवादिपदानामर्था: सास्ना-लांगूलविशिष्टगोत्वादयो वाच्या: गवादयो ध्वनयश्च वाचका: इति बालस्य बुद्धिर्भवति, एवं गामानयेत्यादि-वाक्यश्रवणाद् गवानयनाद्यर्थज्ञानमेतद्वाक्येनैतदर्थस्य वाच्यवाचकभाव-सम्बन्धमन्तरेणानुपपत्तिमित्युनपपित्तिरूपया अर्थापत्त्या बाल: शब्दार्थयो: परस्परं कार्यकारणसम्बन्धमनन्तरञ्च तयोर्वाच्यवाचकसम्बन्धमवगच्छति। अनया दिशा व्यवहारेणान्वितै: पदैरन्वितानामेवार्थानामुपस्थित्याम्, पदार्थ एव वाक्यार्थ:, न त्वपदार्थस्य वाक्य-त्वमिति पर्यवसितं भवति।

गवादीनां सामान्योऽर्थो गोत्वरूपोऽन्वितमानयनादिकं विशिष्टमर्थमाक्षिपत्येव, तथा सति सामान्यस्य विशिष्टेऽर्थे पर्यवसानं स्वत: सिद्धम्। ''निर्विशेषं न सामान्यं भवेच्छशविषाणवदि'' त्यभियुक्तोक्ते:। अयमाशय: - यथा वृक्षपदस्य वृक्षत्वरूपे सामान्येऽर्थे आम्रकदम्बाशोकरूपो विशिष्टोऽर्थस्तदन्तर्गत एव वृक्षत्वेनाक्षिप्यते, तथैव सामान्यानामर्थानां व्यवहारेऽनुप्रयोगात्तदन्तर्गतोऽन्वितो वाक्यार्थे विशिष्ट आनयनादिरूप: समुल्लसत्येव। तदित्थं सामान्यस्य विशेषं विनावस्थातुमशक्यत्वात् पदानां सामान्योऽर्थो विशिष्टेऽन्विते वाक्यार्थे एव पर्यवस्यति। अन्विते अर्थे शक्तिग्रहाद्व्यवहारे चान्वितस्यै-वार्थस्योपयोगित्वादन्वित एवार्थोऽभिधीयते। अत: पदार्थ एव वाक्यार्थ:, न तु पदार्थानां वैशिष्ट्यमिति गहनातिगहनमन्विताभिधानवादिनां प्राभाकराणां दर्शनम्।

परं प्राभाकराणामन्वितार्थाभिधानार्हाप्यभिधा तुरीयं व्यंग्यमर्थमवगमयितुं न प्रभवति। तथाहि ''देवदत्तो गामानयति'' इत्यत्र गोदेवदत्तादीनां सामान्यानामर्थानाम-नन्वितानां कर्तृत्वकर्मत्वादिविशिष्टांशेऽन्विते पर्यवसानादभिधाया अत्रैव विश्रान्ति:। अतो गोपदस्य गोव्यक्तिरूपो विशिष्टोऽर्थोऽभिधाया अगोचर:। व्यक्तिरूपिणि विशिष्टेऽर्थे यदि शब्दानां संकेतस्तर्ह्यनन्त्यव्यभिचारदोषप्रसंग:। एवं पदानां सामान्यस्यार्थस्य कर्मत्व-कर्तृत्वरूपेणान्वयादभिधाया: सामर्थ्यं तत्प्रत्यायनपर्यन्तमेव। इत्थं कर्मत्वकर्तृत्वरूपेण परस्परमन्वितं पदानामर्थमभिधायोपक्षीणा प्राभाकराणामभिधा, गोव्यक्तिरूपिणं विशिष्टमर्थं प्रत्याययितुं नैव पारयति, गोव्यक्तिरूपोऽतिविशेषभूतोऽसावर्थो नैव प्रतिपद्यते इति स्वानुभवमनाच्छादतया मतिमता नैवापलपितुं शक्यम्। अस्ति च प्रतीतिस्तर्हि केन व्यापारेण? अभिधायास्तु पदानां कर्तृत्वकर्मत्वरूपेणान्वितमर्थं प्रत्याय्य विश्राम:। एवञ्च व्यक्तिरूपातिविशेषभूतोऽर्थो यद्यभिधया न

प्रत्याय्यस्तर्हि वाक्यार्थपदवीं दूरमतिक्रम-स्तुरीयकोटिमधिरूढो ध्वननप्राण: प्रतीयमानोऽर्थ: प्राभाकराणामभिधया प्रतिपाद्यते इति का नाम चर्चा।

एवमभिहितान्वयेऽभिधया पदानां सामान्यार्थबोधस्तात्पर्यवृत्त्या च तेषां परस्पर-मन्वयप्रतीति:, अन्विताभिधानवादे चाभिधयैव परस्परमन्वितानामर्थानां बोध इति मतद्वयेऽभिधातात्पर्यवृत्त्योरन्वितेऽर्थे एव पर्यवसानम्। तुरीयं वाक्यार्थकक्ष्योल्लङ्घिनं व्यंग्यमर्थं द्योतयितुं कस्या अपि न सामर्थ्यम्। अतस्तुरीयस्य तस्यार्थस्य व्यंजनया ध्वननमेव युक्तियुक्तम्।

**मीमांसाकैकदेशीयानां मतं तत्खण्डनञ्च-** अन्ये मीमांसकैकदेशीया: ''नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते'' इत्युदाहरन्तो व्यञ्जनां विप्रतिपद्यन्ते। तेषोमयमाशय: लोके घटादय: पदार्था नैमित्तिका: सन्तो मृत्कुम्भकारादीनि कानिचिन्निमित्तान्यपेक्षन्त एव। अनया दिशा शब्दश्रवणानन्तर-मवसीयमान: प्रतीयकानार्थोऽपि किञ्चिन्निमित्तमपेक्षत एव। निर्निमित्तस्य कस्यापि कार्यस्यासम्भवत्त्वात्। अतो व्यंग्यार्थप्रतीतिरपि घटपटादिनैमित्तिकी। ''भम धम्मिअ'' इत्यादि गाथायां निषेधरूपिणो व्यंग्यार्थस्यावगतिर्न शब्दातिरिक्तेन निमित्तान्तरेण सम्भवति। अत: शब्द एवात्र निमित्तम्। शब्दबोधको बोध्यश्च व्यंग्यार्थ:, बोध्यबोधकभावश्च सर्वथा वृत्तिमुखापेक्षी। वृत्तिस्तु शब्दस्य शास्त्रसिद्धाभिधैवेति किमनेन व्यञ्जनाया विचाराऽडम्बरेणेति।

अत्रोच्यते- तत्र निमित्तत्वं द्विविधं भवति। कारकत्वं ज्ञापकत्वञ्च। मृदादयो घटादिकं प्रति कारकत्वेन निमित्तत्वेन अवतिष्ठन्ते। अतो मृदादीनां कारकत्वं नियतम्। यत: शब्दो नार्थस्य जनकोऽतस्यार्थं प्रति मृदादिवन्न कारकत्वेन अवस्थानम्, प्रत्युत ज्ञापकत्वेनैव। नियतसंकेत एव शब्दोऽर्थस्य ज्ञापको भवति, न त्वनियतसंकेत:। अत एवानियतसंकेतेभ्य: शब्देभ्यो नार्थप्रतीति:, तथा सति शब्दस्य यन्निमित्तत्त्वं मीमांसकेनाभ्युपगतं, तन्नियतसंकेतत्वेनैव। शब्दस्य च संकेतोऽभिधेयेऽर्थे एव नियत:। नानाभिधेये व्यंग्येऽर्थे। अत: कथं शब्दाद्व्यंग्यार्थप्रतीति:।

ध्वनिवादिभिरपि व्यंग्यार्थप्रतीतिर्नैमित्तिकीति सम्प्रतिपद्यते, परं शब्दस्य निमित्तत्वं तु व्यञ्जकत्वेनैव न वाचकत्वेन। व्यापारनिरपेक्ष: शब्दोऽर्थप्रत्यायनेऽसमर्थ:। मीमांसकानुमत: शब्दस्य च यो व्यापारोऽभिधा, असौ संकेतनिबन्धन एवार्थप्रत्यायने निमित्ततामुपयाति। व्यंग्येऽर्थे शब्दस्य संकेताभावाद् कथं तस्य तं प्रति निमित्तत्वेना-वस्थानम्। निमित्तता चार्थप्रतीतिर्भवतीति भवतोऽपि नानुमतम्। परं नैमित्तिको व्यंग्यार्थो वाचकत्वेनैव शब्दस्य निमित्तत्वं नापेक्षते। भवति च शब्दाद् व्यंग्यार्थप्रतीतिरतो निमित्तेन केनचिद् भाव्यमेव। निमित्तञ्च शब्द एवात्र। परं न वाचको नियतसंकेत:। प्रत्युत वक्तृवैशिष्ट्यसहकृतो व्यंजकशब्द:, अतएव ''भम धम्मिअ'' इत्यादौ वक्त्रभिप्रायं पर्यालोचयन्त: सहृदया: प्रकरणादिसहकारिसामग्रीवशान्निषेधरूपिणं नैमित्तिकमर्थं व्यंग्यं निमित्ताद्व्यञ्जकाच्छब्दादेवास्वादयन्ति। अतोऽत्र शब्दस्य निमित्तत्वं ध्वननमुखेनैवा-वतिष्ठते, नत्वभिधानमुखेन। व्यञ्जकत्वेन शब्दस्य निमित्तत्वेऽभ्युपगते तन्निबन्धनो व्यंजनाव्यापारोऽप्यभ्युपगन्तव्यो भवति।

**आलंकारिकनये व्यंजनास्थापनम् -** काव्ये व्यंग्यव्यंजकभावाभ्युपगम एवासाधुत्वादीनां दोषाणां नित्यता श्रुतिकटुत्वादीनाञ्चानित्यतेति व्यवस्था सुस्थिता भवति। तद्यथा षकारढकारादयो ये वर्णा: कर्कशा: सन्तो हृदयद्रुत्यात्मनि शृंगारकरुणादौ रसे रसचर्वणां निरुन्धन्तोऽवद्या भवन्ति त एव चित्तदीप्त्यात्मनि रौद्रवीरादौ रसे हृदयसंवादवशाद् गुणत्वं भजन्ते। दोषाणामयं नित्यानित्यत्वविभागो व्यंग्यव्यंजकभावाभ्युपगम एवौचित्यं विभर्ति। अभिधाबोध्योऽर्थस्तु सदा नियतरूप एव। तदङ्गीकारे श्रुतिकटुत्वादीनां दोषाणां सर्वथैव दुष्टत्वमदुष्टत्वं वा स्यात्। तेन च दोषाणामुभयविधविभागो नित्यानित्यरूप: सर्वथा सर्वजनप्रतीतिसिद्धो भ्रश्येत्। परं व्यंग्यव्यञ्जकभावेऽभ्युपगते व्यंग्यार्थस्याभिधेयार्थवन्नियतरूपेणावस्थाना-भावात्। क्वचित् कर्कशानां वर्णानां व्यंग्यं रौद्रवीभत्साहिदकं रसं प्रत्युनकूल-तयावस्थानादुपपद्यत एव दोषाणां नित्यत्वानित्यत्वविभाग:। एतदेवाधोलिखितोदाहरणं विवेचनेनावदातं भवति।

**द्वयं गतं सम्प्रति शोचनीयतां,**
**समागमप्रार्थनया पिनाकिन:।**
**कला च सा कान्तिमती कलावत-**
**स्त्वमस्य लोकस्य च नेत्रकौमुदी।।**

अत्र ''पिनाकिन:'' इति पदं दुष्टम्, तत्स्थाने ''कपालिन'' इति पदसाधु। यतोहि ''कपालिन:'' इति पदं व्यंजकत्वेन भगवतो महादेवस्यानभिभवनीयं रूपं द्योतयत् काव्यार्थं भूषयति, तद्विपर्यये ''पिनाकिन:'' इति पर्यायवाचि पदमीशस्यैश्वर्यं प्रत्यायत् काव्यार्थं दूषयति। यद्यपि पिनाकिकपालिपदयोरभिधेयोऽर्थो महादेवस्य एक एव नियत:, परं तयोर्व्यञ्जकत्वेऽर्थभेद: स्पष्ट एव। व्यंग्यव्यंजकभावाभ्युपगम एव पर्याययोर्मध्ये कपालिपदस्य काव्यानुगुणत्वं पिनाकिपदस्य च दोषत्वम्। यतोहि शिवनिन्दायामत्र तात्पर्यम्-

कपालिपदेन महादेवस्याशुचित्वं वीभत्सत्वं च द्योतितं भवति। पिनाकिपदने च तस्याजगवं धनुरित्यर्थत्वाद् महादेवस्यावरीताऽभिव्यक्ता भवति। परं शिवनिन्दापरे तात्पर्ये सति प्रथमपदानुकूलार्थध्वननात् गुणत्वं द्वितीयपदस्य चानुकूलार्थद्योतनाद्दोषत्वं स्पष्टम्।

''छिद्रान्वेषी महान् स्तब्धो घातायैवोपसर्पती'' त्यादौ पुरुषशिश्नरूपार्थवाचकः शब्दो नोपात्तः। परं तथापि नितान्तमसभ्यार्थस्य प्रतीतिर्भवत्येव। न तत्र वाक्योपात्तानां शब्दानां संकेतः, परमसंकेतितोऽसावर्थः प्रतीतिपथमवतरतीति तत् प्रत्यायनार्थं व्यञ्जनोपास्यैव। अन्यथैवंविधस्य वाक्यास्याभिधेयार्थस्य प्रतीरतौ न काचिददुष्टता।

व्यंग्योऽर्थो वाच्यार्थाद् बोद्धृस्वरूपसंख्यादिवशान्नितान्तं भिन्नः। तथा सति भिन्नत्वात्तयोः प्रत्यायको व्यापारोऽप्यसाजातीय एव स्वीकरणीयः।

**1. तत्र बोद्धृभेदाद् वाच्यार्थव्यंग्यार्थयोः भेदः** -वाच्यार्थः शब्दार्थशासनज्ञानमात्रकृतश्रमाणां वैयाकरणमीमांसकादीनामन्येषा-ञ्चाविदग्धानामपि बोधविषयः। परं व्यंग्यार्थः काव्यवासनाविशदीभूतमनोमुकुराणां विदग्धानामेवास्वादिविषयो, न त्वन्येषाम्। एतं बोद्धृभूताद् वाच्यव्यंग्यार्थयोर्भेदः स्पष्टः।

**2. स्वरूपभेदाद् वाच्यार्थव्यंग्यार्थयोर्भेदः-** ''भम धम्मिअ'' इत्यस्यां गाथायां परिनिश्चितसंकेतस्थाना काचित् पुंश्चली धार्मिकसञ्चरणाद् व्यवहितस्वच्छन्दसम्भोगमहोत्सवा भीरुं धार्मिकं विधिमुखेन गोदानदीकच्छभ्रमणान्निवारयति। अत्र सहृदयैः प्रतिभावशाद् पूर्वोक्तवाच्यार्थातिरिक्तो निषेधात्मा व्यंग्यार्थोऽप्यास्वाद्यते। यतोहि वक्त्रीप्रकरणादिपर्यालोचनाया धार्मिकस्य विहितं भ्रमणं निषेधे पर्यवस्यति। एवं वाच्यार्थोऽविदग्धानामपि स्फुटो विधिरूपः परं विदग्धजनैकवेद्यो व्यंग्यार्थो निषेधरूप एव। विधिनिषेधयोः स्वरूपभेदः सर्वजनानुभवसिद्ध इति स्वरूपभेदाद् वाच्यार्थव्यंग्यार्थयोर्भेदः।

**3. संख्यावशाद् वाच्यार्थव्यंग्यार्थयोर्भेदः -** वाच्यार्थव्यंग्यार्थयोः संख्याकृतो भेदोऽपि प्रत्यक्ष एव। ''सूर्योऽऽस्तङ्गतः'' इत्युच्चारिते सूर्यास्तरूपार्थस्याभिधेयत्वात् वाच्यार्थो नियत एव। परं वक्तृबोद्धृभेदादस्माद् वाक्यान्निरवधिरनन्तो व्यंग्यार्थः परिस्फुरति। नृपेण यदि पूर्वोक्तवाक्यं सेनापतिमुद्दिश्य प्रोक्तम्, ''शत्रूणां दृढेनावमर्दनावसरः'' इत्याद्यभिसारिकां प्रत्युक्तम्। तर्हि अभिसरणमुपक्रम्यताम् इत्यादि वक्तृबोद्धव्यप्रकरणाद्यनुसन्धानात् परिस्फुरितात् परं वाच्योऽर्थः सदा नियत एव। नासौ व्यंग्यार्थवन्नानारूपः। एवं वाच्यस्यैकत्वाद् व्यंग्यार्थस्य च नानात्वात्तयोः संख्याभेदः।

**4. निमित्तभेदाद् वाच्यार्थव्यंग्यार्थयोर्भेदः -** वाच्यार्थस्य प्रतीतिः शब्दोच्चारणनिबन्धनैव परं व्यंग्यार्थोऽभिधे-यार्थवच्छब्दमाकर्ण्य साक्षान्नावबुद्ध्यते। परमसौ प्रतिपत्तृहृदयसंवादप्रतिभावगम्यः। अतएव गड्डरिकाप्रवाहोपहतसहृदयधुराधिकरोणविहीनानां शास्त्रकोषादिज्ञानकृतपरिश्रमा-णां वा हृदये सन्नप्यसावर्थो न परिस्फुरति, एवं निमित्तभेदादपि वाच्यार्थव्यंग्यार्थयोर्भेदः।

**5. कार्यभेदाद् वाच्यार्थव्यंग्यार्थयोर्भेदः -** वाच्यार्थप्रतीतिः केवलमभिधेयार्थबोधपर्यवायिनी, यतो वाचकशब्दात् केवलं संकेतितोऽर्थ एव प्रतीयते। परं व्यंग्यार्थप्रतीतिसमये हृदयसंवादवशात् परमाह्लादोऽप्य-नुभूयते। अतो व्यंग्यार्थावगतिर्न केवलमर्थबोधमात्रपर्यवसायिनी, प्रत्युत परमास्वाद-प्रसवित्री, तेन च कार्यभेदादपि द्वयोर्भेदः स्फुट एव।

**6. कालभेदाद् वाच्यार्थव्यंग्यार्थयोर्भेदः** -वाच्यार्थज्ञानं प्रथमायां कक्ष्यायां भवति। परं वाच्यार्थप्रतीत्योत्तरकालिकं व्यंग्यार्थज्ञानं तुरीयायां कक्ष्यायां भवति। एवं वाच्यार्थव्यंग्यार्थयोः पूर्वपश्चाद्भावेन प्रतीतौ कालभेदोऽपि तयोरनपह्नवनीयः।

**7. आश्रयभेदाद् वाच्यार्थव्यंग्यार्थयोर्भेदः-**वाच्यार्थः शब्दाश्रयः, शब्दोच्चारणमन्तरेण तस्याप्रतीतेः। परं व्यंग्यार्थस्याश्रयस्तु पदपदैकदेशातिरिक्तलोचनचालनभुजप्रक्षेपोरुस्फालनादिकमपि भवति। तद्यथा -

**द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया।**
**प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।।**
**आनीतं पुरतः शिरोऽशुकमधः क्षिप्ते चले लोचने**
**वाचस्तत्र निवारितं प्रसरणं संकोचित दोर्लते।।**

अत्रोरुयुगप्रस्फालनांशुकाधः पातनादिभिश्चेष्टाभिः प्रच्छन्नकान्तविषय आकूतविशेषात्मा व्यंग्योऽर्थो ध्वन्यते। वाच्यार्थः सर्वदा शब्देनैवाभिधीयते। तदभावे तदप्रतीतकः। परं पूर्वोक्तोदाहरणेनेदमवदातं भवति यद् व्यंग्यार्थावगतिर्न सदा वाच्यार्थप्रतीतिवच्छब्द-निबन्धनी, परमशाब्द्या चेष्टयापि व्यंग्यार्थः समुल्लसति। एवं भिन्नाश्रयत्वाद् वाच्यार्थ-व्यंग्यार्थयोर्भेदः स्फुटः।

**8. विषयभेदाद् वाच्यार्थव्यंग्यार्थयोर्भेदः -**

**कस्स वण होई रोसो दटठूणपिआए सव्वणं अहरम्।**
**सभमरपउमग्धाइणि वारिअवामे सहसु एहिणम्।।**

छाया -

**कस्या वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।**

**सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्।।**

खण्डिताधरां काञ्चित कुलटां तस्या: पति: परपुरुषचौर्यरतिशङ्कया अवजानाति। अत: काचित् समीपस्था तद्वयस्या खण्डिताधरवशाद् स्वसखीपतिचेतसि जायमानां चौर्यरतिशंकां वैदग्ध्येनोन्मूलयति यदियं मम सखी भ्रमरदंशवशादेव खण्डिताधारा न तु परपुरुषसम्भोगेन। एवमन्यत्र स्फुटम्।

उपर्युक्तकारणात् स्थलविशेषे च वाच्यार्थलक्ष्यार्थाभ्यां भिनार्थविषयकबोधदर्शनाच्च शक्तिलक्षणावृत्त्यतिरिक्ता व्यञ्जनावृत्तिरवश्यमभ्युपेया इति। यत: ''गंगायां घोष:'' इत्यत्र शक्त्या गंगापदेन भगीरथखातावच्छिन्नजलप्रवाहस्य बोध:, लक्षणया च शक्यसम्बन्ध-गंगातीरस्य बोध: भवति। गंगापदोपस्थाप्यस्य शैत्यपावनत्वादिरूपार्थस्य शक्त्यालक्षणया च बोधासम्भवात् गंगापदजन्यशैत्यपावनत्वादिरूपार्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति व्यंजनावृत्ते: कारणत्वं कल्पनीयमिति। एवञ्च-

मुखं विकसितस्मितं वशितवक्रिमप्रेक्षित......।

इत्यादौ बोध्यमानस्य कुसुमतुल्यसौरभवत्वादिरूपार्थस्य शक्त्या लक्षणया च तादृशबोधासम्भवात् व्यञ्जनावृत्त्या तादृशबोधदर्शनाच्च व्यञ्जनावृत्तेरत्यन्तमावश्यक-त्वमिति साहित्यिकानां सिद्धान्त:।

**न्यायदिशा व्यञ्नावृत्तित्वखण्डनम् -**नैयायिकास्तु शाब्दबोधौपयिकपदपदार्थयो: सम्बन्धरूपावृत्ति: संकेतलक्षणाभेदेन द्विविधा भवतीति स्वीकुर्वन्ति। तेषामभिप्रायस्तु- ''गंगायां घोष:'' इत्यत्र गंगापदोपस्थाप्यशैत्यपावनत्वादिविशिष्टो यो हि बोध: तादृशबोधस्य लक्षणावृत्त्या अनुमानेन वा सम्भवात् व्यंजनाया: अभिधालक्षणावृत्त्यतिरिक्तवृत्तित्वं ते नाभ्युपगच्छन्ति। तदुपरि आक्षिपन्ति साहिहित्यका:, वृत्ते: यद् द्वैविध्यमुपपादितं तन्न साधु, व्यंजनाया अतिरिक्तवृत्तित्वसम्भवाद्, अन्यथा -

मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितम्।

इत्यादौ परस्परविभागजनकक्रियारूपविकासस्य मुखेबाधाल्लक्षितार्थस्यान्वयबोधानन्तरं मुखे कुसुमतुल्यसौरभवत्ताया: चमत्कृतिरमणीयताया वा बोधस्य सर्वजनाभिमत-स्यानुपपत्ति: स्यात्। एवञ्च -

गच्छ गच्छसि चेत्कान्त: पन्थान: सन्तु ते शिवा:।<br>
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्।।

इत्यादौ तव गमनेन मम मरणं भविष्यतीत्यादिबोधस्य सर्वजनानुभवसिद्धस्यानुपपत्तिरिति चेन्न।

तत्र मनसैव स्मृतिसहकारेण कुसुमतुल्यसौरभवत्त्वात्मकपदार्थस्य तव गमनेन मम मरणं भविष्यतीत्यात्मकपदार्थस्य वा बोध: भवत्येव, तर्हि कथं व्यञ्जनावृत्ते: वृत्त्यन्तरं कल्पनम्।

न चैवं गामानयेत्यादिवाक्यानन्तरं तत्तत्पदजन्यतत्तदर्थोपस्थितिसहकृतमनसैव तत्तदर्थविषयकसंसर्गाहि शाब्दबोधो यदि सम्पद्यते तर्हि तत्तदर्थविषयकसंसर्गावगाहि-शाब्दबुद्धित्वावच्छिन्नं प्रति शक्त्या तत्तदर्थविषयकोपस्थिते: कारणत्वमनावश्यकम्, अर्थात् शक्त्यादे: वृत्तिकल्पनमयुक्तमिति वाच्यम्।

वृत्त्या पदजन्यपदार्थोपस्थिते: कारणत्वं नाभ्युपेयते चेत् तर्हि यत्र वृत्त्या पदजन्यपदार्थोपस्थिति: तत्र तदार्थान्तरस्य मनसैव शाब्दबोधसम्भवात्, तत्र च एतादृशकारणस्य विरहाद् व्यतिरेकव्यभिचार:, तादृशव्यभिचारवारणाय शक्त्यादे: वृत्तित्वकल्पनमावश्यकमिति।

ननु ''विकसितं स्मितम्'' इत्यंशस्य मुखे विशेषणत्वं दरीदृश्यते। तर्हि विकसितमिति वाक्यं कर्मधारयसमासेन बहुव्रीहिसमासेन वाक्येन निष्पद्यते? ''विकसितञ्च तत् स्मितञ्चेति'' कर्मधारयसमासेन नैवाभ्युपेयते। यत: कर्मधारयसमासनिष्पन्नवाक्यस्य विकासविशिष्टहास्यरूपार्थस्य मुखे बाधाद् अभेदसम्बन्धेन विकासविशिष्टहास्यरूपार्थस्य मुखे नैवान्वय इति। अत: ''मुखे प्रकटितस्मितवत्तामनुभाव्य'' इत्याद्युत्तरग्रन्थानुरोधात् मुखे प्रकटितहास्याश्रयत्वलाभानुरोधाच्च ''विकसितं स्मितं यत्र'' इत्याकारको बहुव्रीहिसमासोऽभ्युपेयते। तथा च बहुव्रीहिसमासनिष्पन्नविकसितस्मितमिति-समस्तपदस्य विकास-विशिष्टहास्याश्रयत्वरूपार्थेऽभ्युपगते सति विकसितस्मितपदार्थस्य अभेदसम्बन्धेन मुखान्वयसम्भवात् विकसितहास्याश्रयत्वस्य मुखे प्रतीयमानत्वमिति।

काव्यप्रकाशकारिकोक्तान्तर्गतविकसितस्मितमित्यंशे सन्निविष्टविकसितशब्द विस्ताररूपेऽर्थे लक्षणाकल्पनीयतयोक्तविकासपदस्य यो हि लाक्षणिकार्थ: तस्य विकास-विशिष्टार्थस्य स्मितपदार्थे हास्येऽन्वय:। तथा च बहुव्रीहिसमासाभ्युपगतत्वात् तादृशहा-स्याधिकरणताया: मुखेऽनुभूतत्वं भविता। एवञ्च तादृशानुभवानुकूल्येन उक्तलक्षणामूल-कव्यञ्जनावृत्त्या मुख्यावयवे कुसुमतुल्यसौरभवत्ताया: यादृशी प्रतीति: तादृशी प्रतीतिस्तु लक्षणामूलव्यंजनावृत्तिस्वीकारेणैव भविता इति मन्तव्यम्। अत: शक्तिलक्षणातिरिक्त-व्यंजनावृत्तिरभ्युपेया इति चेन्न विपूर्वककास्धातूत्तरक्तप्रत्ययेन निष्पद्यमानत्वात् विकसितशब्दस्य वाच्यत्वमिति। एवञ्च न्यायमते वाक्ये शक्त्यभावात् शक्यसम्बन्धिरूप-लक्षणाया: कल्पयितुमसमर्थत्वादित्यपि वक्तुं न पार्यते- यतोहि

चित्रगु: इत्यत्र यथागोपदस्य चित्रगोस्वामिरूपार्थे लाक्षणिकत्वं चित्रपदं तात्पर्यग्राहकत्वं तथैव विकसित-शब्दान्तर्गत कास् धातो: विस्ताररूपार्थे लाक्षणिकत्वं क्तप्रत्ययस्य च तात्पर्यग्राहकत्वमि-त्यभ्युपगतत्वाद् उपर्युक्ता शंका पराभूता इति।

ननु मास्तु लक्षणामूलव्यंजनावृत्ति: किन्तु अभिधामूलव्यञ्जनावृत्ति: तस्या व्यतिरिक्ता इत्यपि साधु संगच्छते। यत: प्रकरणादिकिरणान्तरसाचिव्येन नानार्थकशब्दात् क्वचिद् एकप्रकारकान्वयबोधानन्तरं सहृदयव्यक्तिनामन्यविषयकान्वयबोधदर्शनाद् अभिधया लक्षणया वा अनुपस्थितत्वाद् अभिधामूलव्यंजनाया: कारणत्वमभ्युपेयम्। तद्यथा - 'अयं गौरवितो महान्' इत्यस्माद्वाक्याद् अयं पूज्य: महाशयश्च, इत्या-कारकवाक्यार्थबोधानन्तरम् 'अयं गौ: मेषाद्वृहत्' इत्याकारकाभिधामूलव्यंजनावृत्त्या विलक्षणशाब्दबोधो भवति। आदौ तावद् ''अयं गौरवितो महान्'' इत्यत्र पदत्रयात् समुदायात्मकशक्यार्थबोधोत्पत्युत्तरं ''गौरवितो'' इत्याकारकशब्देकदेशस्थप्रथमान्त-गोपदात् गोव्यक्ते:, पञ्चम्यन्ताविशशब्दात् मेषस्य अवधिमत्त्वस्य च पदार्थस्य एवं प्रथमान्तमहत्पदात्महत्पदार्थोपस्थितिक्रमेणविलक्षणान्वयबोधस्य उत्पत्तिर्भवत्येव। एवं प्रकारेण समुदायशक्यार्थबोधस्य अवयवशक्यार्थबोधस्य च दृष्टान्तत्वेन प्रदर्शनानन्तरं प्रत्येकशक्त्या विभिन्नविषयस्य व्यंजनावृत्तिलभ्यपदार्थान्तरविषयकान्वयबोधार्थं वयस्थे-त्यादिदृष्टान्तान्तरं प्रदर्शयति जगदीश:।

दृष्टान्तान्तरत्वस्य अङ्गीकारविषये टीकाकत्त्रा रामभद्राचार्य: प्रवदति ''अयं गौरवितो भवान्'' इत्याकारकप्रथमदृष्टान्तस्थले 'गौरवित:' वाक्यात् पूज्यत्वप्रकारक: यादृशान्वयबोध: जात: तादृशान्वयबोधस्तु पूज्यरूपार्थ: वाक्यार्थरूपेण प्रतीयते न तु पदार्थरूपेण अत: नानार्थक: वयस्थेत्यादि दृष्टान्तान्तरत्वग्रहणमिति।

**वयस्था नागरासंगादङ्गानां हन्ति वेदना-** एतद्वाक्याधीनवाक्यार्थबोध: शक्त्या भवति वयस्था: स्त्रिय: नागरपुरुषसंगाद् अंगानां वेदनां घ्नन्तीति। एवञ्च पक्षान्तरे वयस्था हरीतकी, नागर: -शुंठा, तत्संगात्- तत्सहयोगात्, अर्थात् भक्षिता अंगानां वेदनां हन्तीत्यर्थविषयकबोध: भवति। एतादृशबोधस्तु शक्तिमूलव्यंजनावृत्त्या भवतीति।

अभिप्रायस्तु - पूर्वोक्तवाक्यद्वयान्तर्गप्रथमवाक्याद् पूज्यत्वप्रकारकबोधानन्तरं मेषम् अवधित्वेनाभ्युपेत्य स्थूलत्वादिविषयक: यो हि बोध: (एवञ्च) द्वितीयस्माद्वाक्याद् युवत्यादिविषयकबोधानन्तरं हरीतक्यादिविषयकबोधश्च शक्तिज्ञानाधीनां न भवति।

तात्पर्यास्तु - कुत्रचिदपि शक्तपदज्ञानाधीनतत्तदर्थविषयकशाब्दबोध: प्रसिद्ध: स्यात् चेत् तदैव तर्हि शक्यार्थविषयकान्वयबोधस्य प्राक्क्षणावच्छेदेन तादृशार्थे तात्पर्य-ज्ञानं तात्पर्यग्राहकप्रकरणादिज्ञानं वा कारणत्वेनाभ्युपगतं भवेत् पूर्वोक्तवाक्यद्वयस्थले च श्लिष्टार्थविषयकबोधात् प्राक् तात्पर्यज्ञानं तादृशप्रकरणादिज्ञानं वा नैवानुभवसिद्धमित्यत: तादृशान्वयबोध: नैव शक्तिज्ञानाधीनोद्भूत:। एवञ्च यदि आलंकारिका: प्रवदन्ति- पूर्वोक्त: तादृशविलक्षणबोध: शक्तिज्ञानादनुत्पद्यमानत्वेऽपि तादृशार्थे लक्षणास्वीकरणाद् लक्षणाज्ञानाधीनतादृशविलक्षणान्वयबोध: सम्भवतीत्यपि वक्तुं नैव शक्यते यत: अविशब्दाद् मेषपदार्थस्य वयस्थाशब्दाद् हरीतकीपदार्थस्य च शक्त्या उपस्थितिसम्भवात् शक्यार्थमात्रे लक्षणा नाभ्युपगच्छन्तीति समेषामाशय:, जगदीशाचार्यैरपि पूर्वमुक्त: -

तच्छक्तिविधुरं यदि।

एतस्मात्कारणात् दर्पणकारैरुक्ता कारिका -

**अनेकार्थस्य शब्दस्य प्रस्तावाद्यैर्नियन्त्रिते।**
**एकत्रार्थेऽभिधामूलव्यंजनान्यस्य बोधिका।**

निराकृता। अन्यच्च शाब्दबुद्धित्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य कारणत्वस्य पूर्वं खण्डितत्वात् तात्पर्यज्ञानस्य कारणत्वेन्नाभ्युपेत्य व्यंजनावृत्तिस्वीकारे प्रमाणाभाव:।

व्यंजनावृत्त्यङ्गीकर्तृणाम् आलंकारिकाणां मतनिराकरणावसरे तार्किकै: जगदीशाचार्यैरुक्तम्-

''वस्तुत: शक्त्याद्युपस्थितानामेकविधानां पदार्थोनामन्वयबोधानन्तरं यद्यन्य-विधानामन्वयबोध: स्यात्। स्यादपि तदनुरोधेन व्यञ्जनास्वीकार:, न चैवं, तत्तदर्थकशाब्दसामान्यं प्रत्येव तत्तदर्थनिस्तात्पर्यकत्वधिय: प्रतिबन्धकत्वात्, तत्तदर्थानां यथाकथञ्चिदुपनयवशेन मनसैव विशिष्टधीसम्भवात्, मनोरथिकसुखप्रभेदपर्यवसितं चमत्कारं प्रत्यपि शाब्दस्यैव मानसस्यापि बोधस्य विशिष्यहेतुताया: सुवचत्वात्, अतिरिक्तस्य व्यंजनाख्यपदार्थान्तरस्य स्वरूपसत्या अन्वयवुद्धौ तद्धेतुत्वस्य च प्रमाणविरहेणासत्त्वाच्चेति संक्षेप:।'

तात्पर्यास्तु - व्यञ्जनावृत्ति नैवाभ्युपेयते चेत् तर्हि नानार्थक-शब्दादेकविधप्रकारका-न्वयबोधानन्तरं अन्यविधप्रकारकान्वयबोध: कथं सम्भवति? विशेषत: शक्तिज्ञानादि-कारणात् पदार्थोपस्थितिद्वारा एककालावच्छेदेन समेषां शक्यपदार्थानामन्वयबोध: स्यात्। यद्युच्यते व्यंजनावृत्तिस्वीकारेऽपि एकविधप्रकारकशक्यार्थबोधसमानकालीनान्यार्थ-विषयबोध: कथं न सम्भवति, इत्याशंकायाम् आलंकारिका: प्रवदन्ति- व्यंजनावृत्तिजनितविलक्षणबोधात्मक कार्यांशे तत्तत्पदगतैकशकित्प्रयोज्यार्थविशेषविषय-कानन्तर्यस्य निवेशनीयतया व्यञ्जनावृत्तिप्रयोज्यातादृशविलक्षणान्वयबोध: सम्भाव्यते। एवञ्च व्यञ्जनावृत्त्या यादृशार्थविषयकबोध: सम्भवति तादृशबोधस्तु

प्रकारान्तरेण नैव सम्भवतीत्यत: तादृशविलक्षणबोधसाधकव्यंजनावृत्तिरावश्यकीति चेन्न व्यंजनावृत्ति-जनितादृशान्वयबोधस्याप्रसिद्धत्वात्, तादृशबोधार्थं व्यंजनावृत्तिर्निष्प्रयोजना इति। यत: पदगतशक्तिलक्षणान्यतरवृत्तिज्ञानाद् एकविधप्रकारकपदार्थविषयकबोधानन्तरं यदि तादृशपदगतशक्ति लक्षणावृत्त्यन्तरात् कोऽपि अन्वयबोधानुभव: सिद्धश्चेत् तर्हि विलक्षणान्वयबोधानुरोधेन व्यंजनावृत्तिस्वीकार:। किन्तु तादृशविलक्षणान्वयबोध-स्याप्रसिद्धत्वात् तादृशाप्रसिद्धार्थविषयकान्वयबोधार्थं व्यंजनावृत्त्यभ्युपगमे प्रमाणाभाव:। भवतु नाम व्यंजनावृत्तिस्वीकारे प्रमाणाभाव: किन्तु नानार्थकशब्दात् शक्तिप्रयोज्यैक-विधार्थविष्ज्ञयकान्वयबोधानन्तरमन्यविधशक्यार्थविषयकान्वयबोध: कथं न भविता? इत्याकाङ्क्षायामुच्यते- ''तत्तदर्थविषयकशाब्दबोधं प्रति तत्तत्पदधर्मिकतत्तदर्थविषयक-तात्पर्यशून्यज्ञानस्य प्रतिबन्धकत्वाद् एकविधशक्यार्थविषयकान्वयबोधस्य उत्पत्यनन्तरम् अन्यविधशक्यार्थबोधस्य नैव प्रसक्ति:। किनतु नानार्थकशब्दाद् एकविधशक्यार्थ-बोधानन्तरम् अन्यविषयकस्य अलौकिकमानसप्रत्यक्षं भवति न तु विलक्षणशाब्दबोध इति अवगन्तव्य:।

एवञ्च प्रकृतेऽपि: ''गौरवितो महान्'' ''वयस्था नागरसंगात्'' इत्यत्रापि शक्तिलक्षणान्यतरवृत्तिज्ञानाधीनपदार्थोपस्थित्त्या तत्तदर्थपूज्यत्वादिविषयकसंसर्गावगाहि-बोधानन्तरं वाक्यैकदेशपदार्थोपस्थित्या गोरवधित्वप्रकारकबोधस्य भक्षिता अंगानीत्यादि-विषयकबोधस्य च ज्ञानलक्षणासन्निकर्षजन्यालौकिकमानसप्रत्यक्षत्वात् न तादृशविशिष्ट-शाब्दबुद्धि: सम्भवति न वा व्यञ्जनाया: वृत्यन्तरत्वमिति।

अन्यच्च - व्यञ्जनावृत्यङ्गीकारे स्वरूपसती उत वा ज्ञाता सती कारणमिष्यते? स्वरूपसतीकारणमिष्यते चेत् - विकसितादि पदेन सर्वदा सर्वस्यैव व्युत्पन्नस्य कुसुमतुल्यसौरभवत्त्वस्य प्रतीति: स्यात्, न हि केवलं सहृदयस्य पुरुषस्य बोध:, अपितु सहृदयरहितस्य पुरुषस्य तादृशबोध: स्यात्, तत्रापि स्वरूपसत्यात्मककारणस्य विद्यमानत्वात्। ज्ञातासतीकारणत्वमभ्युपेयते चेत् तर्हि सा किं ग्राहकमित्यपि वक्तव्यम्। शक्तिग्राहकं व्याकरणादित: लक्षणाग्राहकं च प्रत्यक्षादिप्रमाणत: भवति। ज्ञानसामान्यसामग्रीज्ञातासतीग्राहक-मित्युच्यते चेत् तर्हि स्वरूपसती स्वीकारे यो दोष: अत्रापि तद्दोषो भवतीति व्यञ्जनाया: वृत्यन्तरत्वं नास्तीति नैयायिकानां सिद्धान्त:।

**विमतनिरासपूर्वकं व्यञ्जनावृतितस्थापनम्-** अत्रानुपदमेवोपस्थापितानि व्यञ्जनावृत्तिविषयकविविधविमता-नि निराकर्तुं समीक्ष्यन्ते। तत्रादौ स्मृतिसहकृतमनसा निर्वाह उक्त:, स च नोपयुक्त: तथाहि स्मृतोऽर्थ? शब्देन सम्बद्धोऽसम्बद्धो वा? सम्बद्धश्चेत्तर्हि सम्बन्धसामान्ये तद्विशेषेण वा? नाद्य: निर्विशेषां न सामान्यम्' इति सिद्धान्तविरोधात्। द्वितीयपक्षे त्वभीष्टमेव मतमाग-च्छति अयमेव च सम्बन्धविशेषे व्यञ्जनात्वेन स्मर्यते प्रेक्षापद्भि:। असम्बद्धत्वपक्षे त्वनियमप्रसङ्ग, यश्च स्वयमपि दूरोत्सारित:।

अन्यच्च नहि शैत्यादिकमर्थं 'मनसा साक्षात्करोमीत्युनव्यवसाय: कस्यापि सह्दयस्यानुभवपदमारोहति, अपि तु गङ्गापदाद् व्यञ्जनया जानामीत्येवानुव्यवसाय: प्रामाण्यपदवीमलङ्करोति।

किञ्च, व्यञ्जना स्वरूपसती ज्ञाता वा बोधहेतुरिति विकल्पोऽप्यापातरमणीय एव, शब्दस्थले ज्ञायमानाया बोधहेतुत्वस्य सिद्धान्तितत्वात् तद्ग्राहकञ्च वक्तृबोद्धव्यादीनां ज्ञानम्। अन्यत्र स्वरूपसत्या एव तस्यास्तत्वेनाङ्गीकारात्। वक्तृबोद्धव्यादीनां तात्पर्यस्य वा ज्ञानं तत्र सहकारीति स्वीकारेण सर्वदोषनिरासात्। शक्तिलक्षणाभ्यां व्यञ्जनाया गतार्थतात्वनुपदमेव निराकृता।

व्यञ्जनाया अनुमानगतार्थत्वपक्षेऽपि न युक्त:, यतो हि व्याप्तिज्ञानाद्यभावेऽपि साध्यसिद्धावपि वाक्यश्रवणोत्तरं स सोऽर्थ: प्रतीयत एव कथङ्कारमनुमानं तत्र पुरस्क्रियते।

एवञ्च व्यक्तिविवेककृतोऽपि मतं न समीचीनम्, परमते स्वरूपासिद्धयादिदोषग्रासाच्च। तथा चात्र बहुमान्लवो दर्शित: श्रीहरिदासभट्टाचार्येण काव्यं रसादिवद्विभावादिमत्वादित्यत्र हेतुताऽवच्छेदकसमवायसम्बन्धेन विभावादिप्रतीते: सम्यक्वृत्तित्वेन काव्यरूपे पक्षे तत्सम्बन्धेन वृत्तित्वाभावेन स्वरूपासिद्धि:, पक्षे हेत्वभावेन तत्र हेतुज्ञानाभावे व्याप्ति: कारणं कुत: य इति साहित्यदर्पणकृताप्ययं सिद्धान्त: समर्थित:।

किञ्च, व्यञ्जनाजन्यबुद्धौ बाधविषय: प्रतिबन्धक:, अनुमानजन्यज्ञाने तु स प्रति बन्धको भवत्येवेति नानुमानगतार्थतास्या:।

तात्पर्यवृत्त्या गतार्थेऽयमिति चतुर्थमपि मतं न समीचीनम्, यतो हि यद्यत्र आलङ्कारिकाभिप्रेता तात्पर्यवृत्ति: स्वीक्रियते, तर्हि वाक्यार्थरूपस्य पदार्थद्वयसंसर्गस्य बोधनाय सा वृत्तिरङ्गीकृतास्ति। तस्या अत्र सामर्थमेव नास्ति। अतएवाभिधा-लक्षणातात्पर्यख्यासु तिसृष्वपि वृत्तिषु विरतासु चतुर्थी व्यञ्जनावृत्तिरुपास्यते इत्युक्तम्।

यदि तु शाब्दबोधे हेतुभूतं तात्पर्यज्ञानमभिप्रेयते, तदास्तु नाम शाब्दहेतुता तस्य भवदुक्तं नियमनपि तदीयमस्तु नाम वृत्तिस्त्वियं स्वीकरणायैव शाब्दबोधे पदवृत्तिजन्योपस्थिति विषयस्यैव पदार्थस्य मानाय। अन्यथा शक्तिलक्षणयोरपि कथं न त्याग:? उक्तानुक्तव्यवसायविरोधस्तु स्थीयत एवेति विचारणीयतामञ्चति सचेतसाम्।

**सन्दर्भग्रन्थाः**


1. कैयटः, महाभाष्यप्रदीपटीका, पस्पशाह्निकम्
2. नागेशः, वैयाकरणसिद्धान्तलघुमञ्जूषा, शक्तिनिरूपणम्
3. कैयटः, महाभाष्यप्रदीपटीका, 1.1.7
4. नागेशः, महाभाष्यप्रदीपोद्द्योतटीका, 1.1.7
5. पाणिनिः, अष्टाध्यायी, सू.सं. 3.4.78
6. पाणिनिः, धातुपाठः, सं. 752
7. तारानाथतर्कवाचस्पतिः, हलायुधकोशे
8. पाणिनिः, अष्टाध्यायी, सू.सं. 3.3.94
9. पाणिनिः, अष्टाध्यायी, सू.सं. 3.3.19
10. पाणिनिः, अष्टाध्यायी, सू.सं. 3.3.94
11. ऋक्प्रातिशाख्यम्, 13.46
12. कात्यायनश्रौतसूत्रम्, 20.2.14
13. मनुः, मनुस्मृतिः,4.259

14० आपस्तम्बः, आपस्तम्बधर्मसूत्रे, 6.9